"केषांचन मते कार्यत्वदृष्ट्या नित्यतादृष्ट्या वा वर्णपद-वाक्यानां परस्परमेकैकशो वा नैव कथंचिदपि पृथक्त्वं भिन्नता वा विद्यते। ते तु खल्वभिन्नत्वेनैव कार्यरूपमप्यावहन्ति नित्यरूपमपि च। परं सन्त्यपरे पुनरालोचका येषां मते तेषां नित्यत्वकार्यत्वभेदयोः सर्वथा पृथक्त्वमेव सिद्ध्यति, नान्यथा। अतएव ते प्रयोगसंख्यानुसारं तेषामपि नानात्वं संभावयन्ति।"

In the following passages we will find the mention of the Phoneme (Varṇa), the Usable Word (Pada), and the Sentence (Vākya). There may be many more divisions of this kind. But there are two distinct Schools of thought regarding their individual, or otherwise, existence. According to *one*, these differences relate to the 'form' only. From the point of view of purpose, all of these 'forms' are nothing but the parts of one and the same thing, *i.e.*, of one and indivisible 'statement'. Or, they are retained in the mind in that form and don't differ or multiply depending on the number of their pronouncements.

According to the *other* School, every time they are pronounced, they have separate existence.

यहां कार्य और नित्य का विवेचन 'शब्द' के विषय में न होकर वर्ण, पद, वाक्य के उभय रूपों के प्रसंग में है—

"कुछ आचार्य वर्ण, पद और वाक्य के प्रायोगिक अथवा नैमित्तिक रूपों को परस्पर अभिन्न और एकात्मा स्वीकार करते हैं। किन्तु कुछ दूसरे आचार्य इनके दोनों रूपों की परात्पर भिन्नता मानते हैं, और इसीलिए 'नानात्व' की कल्पना करते हैं। अर्थात्, जितनी बार भी इनका प्रयोग होता है. उतनी ही संख्या में ये नए बनकर सामने आते हैं।"

टिप्पणी:—यहाँ शब्द के कार्य और नित्य रूपों की चर्चा नहीं है। 'इन्द्रियनित्यं वचनमौदुम्बरायणः' के रूप में यास्कवचन, 'किं पुनरिमे वर्णा अर्थवन्तः ?' की महाभाष्य की शंका, एवं वार्ष्यायणि के 'एकैकवर्णवर्तिनी वाक्' आदि मतों की विवेचना के रूप में यह उपसंहार प्रस्तुत है। वर्ण, पद, वाक्य आदि का परस्पर क्या सम्बन्ध है, एवं उनके 'एकत्व-नानात्व' का क्या अर्थ है ?, इत्यादि प्रश्नों का संक्षिप्त उत्तर ही इन पाँच श्लोकों में दिया गया है।

पदभेदेऽपि वर्णानामेकत्वं न निवर्तते।
वाक्येषु पदमेकं च भिन्नेष्वप्युपलभ्यते ॥७१॥

"यथा परस्परं भिन्नेष्वपि वाक्येष्वेकमेव पदं पुनःपुनः प्रयुक्तो दृश्यते, तथैव भिन्नेष्वपि पदजातेषु तदेव वर्णजातं पुनःपुनरपि प्रयुज्यमानो दृश्यते। तस्य चैकत्वं सर्वत्रापि सुनिश्चितमेव। देशकालावस्थाव्यत्ययादिभिन्नत्वात् तन्नैव भिद्यते। पुनःपुनरुच्चार्यमाणत्वात् संख्याभेदमात्रमेव सिद्धयति, न तु कश्चनात्मनो भेदः; संख्याभेदस्यापि एकत्वादेव जन्महेतोः संभवात्। आत्मैकत्वादेव पदस्यापि भिन्नकालादिष्वुच्चार्यमाणस्य संख्याभेदेप्यैकत्वं नैव व्यवच्छिद्यते।"

We may pronounce different padas at different occasions, still their similar sounds may be accepted as 'one' and 'the same'. The multiplicity of number is related to the 'pronunciation', and not to the phoneme or the word as such;

their unified existence being the subject of 'mind'. Pronunciation helps it to be expressed again and again. The same is true about a 'pada' being used in so many different sentences. Separate existence in different sentences does not make it different, basically, every time.

"भिन्न-भिन्न पदों में प्रयुक्त होने पर भी कोई वर्ण आत्मा या वास्तविकता की दृष्टि से एक और अभिन्न ही रहता है। उसी प्रकार, जैसे कि भिन्न-भिन्न वाक्यों में प्रयुक्त होने पर भी समानाकृति और समान भाव वाला वही पद मूलतः 'एक' ही रहता है, और अवस्थादेशकालादिभेद से, या संख्या भेद से, ही अनेक या भिन्न स्वीकार नहीं किया जा सकता।"

टिप्पणी :—महाभाष्य के द्वितीय आह्निक में 'अइउण्' माहेश्वर सूत्र की व्याख्या में **'आवृत्तिसंख्यानाद् वा'** से आरम्भ होने वाले विवेच्य विषय को ही यहाँ लिया गया है। **'युगपद्देशपृथक्त्वदर्शनाद्वा'**, **'आकाशदेशा अपि बहवः'**, आदि विविध वार्त्तिकों का विवेचन इसमें हो गया है। अन्ततः भर्तृहरि और पतंजलि वहां साफ़ और समान रूप से घोषित करते हैं : **'आकृतिग्रहणात् सिद्धम्'**, —**"तयोस्त्वाकृतेर्न व्यवधानं, व्यवच्छेदो वा** (त्रिपदी)"; **'रूपसामान्याद् वा'**, आदि।

न वर्णव्यतिरेकेण पदमन्यच्च विद्यते।
वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किंचन ।।७२।।

वार्त्तिककारस्य महाभाष्यप्रोक्तं 'संघातार्थवत्वाच्चे'ति वार्त्तिकमनुसरन्नुपस्थापयति:—

"भौतिकदृष्ट्याऽपि पदनाम्नाऽभिहितं रूपं वर्णानां संघातभूतमेव, नान्यत्। तान् विना तस्य सत्ताया असंभवात्। एवमेव वाक्यविषयेऽपि। पदानां संघातः, पदोपस्थितिर्वा वाक्ये हि दृश्यते। तेषामुपस्थितिं विना तस्य सत्ताया असंभवात्। अथवा कथयिष्यति —"वाक्यार्थस्य तदैकोऽपि वर्णः प्रत्यायकः क्वचित्।" अतो वर्णानामपि वाक्यत्वसंभवः। अथवा वर्णेभ्यो निर्मितानि पदानि ह्येव वाक्ये प्रयुज्यन्ते। तत एव सिद्ध्यति यद् वर्णव्यतिरेकेण विनापि वाक्यस्याऽसंभवः।"

The very existence of the 'padas' depends on the phonemes. In one way, a 'pada' is nothing but a mere collection of phonemes. Similar is the case of a Sentence, which is nothing but a mere collection of phonemes or padas (*i.e.* words). If the formation of a 'pada' depends on the phonemes, then the formation of the sentence also depends on the phonemes and the padas.

"यदि वर्णों की स्थायी सत्ता न मानें तो पद की सत्ता भी स्वीकृत नहीं होती। और यदि पद और वर्ण की सत्ता बुद्धिनित्य रूप में न मानें, तब 'वाक्य' का अस्तित्व भी सिद्ध नहीं होता। इसलिए वर्ण और पदों का बुद्धि में नित्यत्व इसलिए मानना ज़रूरी है, ताकि 'वाक्य' को एक इकाई मानकर उसके अर्थैक्य पर विचार किया जा सके।"

टिप्पणी :—महाभाष्योक्त वार्त्तिक 'संघातार्थवत्वाच्च' तथा उससे सम्बद्ध विवाद का सैद्धान्तिक आधार यहां लिया गया है। वर्ण और पद की भौतिक सत्ता स्वीकार करने का यह अर्थ नहीं कि उन्हें सार्थक इकाई भी मान लिया गया है। त्रिपदी टीका में भर्तृहरि कहते हैं—"एवं समुदायो द्रव्यं ब्रवीति। जात्यादीस्त्ववयवान् वर्णाः। अथवा यद्वत्पदानि सापेक्षाणि तमेवार्थमाहुरेवं तमेवार्थं वर्णा अपि परस्परापेक्षया ब्रूयुरिति।" इत्यादि।

पदे न वर्णा विद्यन्ते, वर्णेष्ववयवा न च।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥७३॥

वाक्यपदवर्णवर्णभागानां परस्परापेक्षित्वं सूचयन् वाक्यस्यैकत्वमखण्डत्वं च प्राह :—

"बुद्धौ वर्णानां पदानाञ्चाकृतिनित्यत्वे प्रयोगबाहुल्येऽपि च तेषां न तथा प्रयोगः प्रयोजनं वा। आत्माभिव्यक्तेः प्रयोजनत्वात् तेषां न कथंचिदपि प्रत्यायनपरं प्रयोजनम्। आत्माभिव्यक्तिश्च वक्तुरिच्छायाः प्रकाशनव्यापार एव। सा च वाक्यभूतेनैकत्वेनैव व्यज्यते, नान्यथा। अतो वाक्यात्मतया वाक्प्रयोजनस्यैकत्वे स्वीकृते पदानां वर्णानां वा व्यक्तिशः प्रयोजनस्वीकरणमहेतुकमनर्थकं चैव सिद्ध्यति। अभिधेयस्य च निष्पत्तौ वर्णार्थानां पदार्थानां वा न कथंचिदप्युपयोगः संभ-

वति। तदेव सत्यं पदत्वे पदविषये वा वर्णानामपि कृते । तच्चैव सत्यं वर्णेषु वर्णभागानामुपस्थितिस्वीकृतिविषयेऽपि। कमप्येकमेकत्वेन स्वीकृत्य कृते कार्ये नैवाऽन्येषां सत्तया किमपि प्रयोजनम् ।"

Yet, it is a fact that phonemes have no place of pride, at least not as a recognisable unit, in the making up of a pada. The same is true about the Allaphones or other phonemic parts, being found in a '*phoneme*'. Those have no value, even if found to be present, as far as a 'phoneme' is concerned. Merely the presence of these parts does not debar us from taking a 'pada' and a 'phoneme' as a grammatical or phonetic unit, respectively.

And if it is so, how a sentence may be supposed to be composed of different 'padas', while semantically it is indivisible and invariable Unit of Speech. Even if separately recognised, *padas* have no purpose to serve, while standing alone; their formation depending itself on the formation of a *sentence*. Their existence becomes meaningless, without it.

"जब हम पद पर विचार करते हैं, तब वर्णों की पृथक्-सत्ता स्वीकार करने का कोई प्रयोजन नहीं रहता । जब हम वर्ण पर विचार करते हैं, तब उसमें घटक रूप से विद्यमान वर्णभागों की सत्ता की स्वीकृति का कोई प्रश्न नहीं उठता । इसी प्रकार जब हम वाक् की इकाईभूत **वाक्य** पर विचार करते हैं, तब उसे बनाते दीखने वाले 'पद' अर्थहीन या प्रयोजनहीन हो उठते हैं । क्योंकि वहां उद्देश्य वक्ता की इच्छा की आत्माभिव्यक्ति होता है । पद उन्हें व्यक्त करने के माध्यमभूत होते हैं । वाक्यार्थ केवल उनके आकार या अर्थों तक ही सीमित नहीं होता । इसलिए वाक्य में **पद**, पदों में **वर्ण** और वर्णों में **वर्णभाग** अपने-अपने अस्तित्व को रखकर भी प्रयोजनहीन अथवा महत्त्वहीन हो उठते हैं ।"

टिप्पणी :—यहां भर्तृहरि की त्रिपदी टीका में निम्न भाष्योक्तियों और वार्त्तिकों का विवरण महत्त्वपूर्ण और अवधेय हो उठता है :—"य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतय: ।'···इह हि समुदाया अप्युपदिश्यन्ते, अवयवा अपि । आभ्यन्तरश्च समुदायेऽवयवास्तद्यथा-वृक्षः प्रचलन् सहावयवैः प्रचलतीति ।··· तथा 'स्फोटमात्रं प्रतिनिर्दिश्यते ।" इत्यादि ।

२—यहां 'वर्णविभाग' की समस्या के लिए देखें लेखक का तत्सम्बद्ध विशेष लेख 'वर्णों का विभाजन ।'

भिन्नं दर्शनमाश्रित्य व्यवहारोऽनुगम्यते ।
तत्र यन्मुख्यमेकेषां तत्रान्येषां विपर्ययः ।।७४।।

वर्णपदवाक्यानधिकृत्य कृतान् विविधान् वादान् खण्डसत्यरूपेणैव स्वीकरोति, नान्यथा—

"वर्णभागं वर्णं पदं वाक्यं वाऽधिकृत्य तेषामर्थवत्तया प्रयोजनवत्तया च ये खलु विविधा वादाः प्रचलितास्तेषां कारणमिदमेव यद् विचारकाणां दृष्टिस्तत्र तत्र भिन्नमेव प्रयोजनमाश्रित्य प्रसृता । अनेनैव कारणेन यदा तेषु कोऽपि कमप्येकं सार्थकत्वेन स्वीकरोति, तदा तस्यमतेऽन्येषां प्रयोजनमर्थहीनं जायते । यथा वर्णवादिनां मते वर्णभागपदवाक्यानामस्तित्वं सार्थकत्वं वा निष्प्रयोजनम् । तदेवास्ति सत्यमन्येषां विषयेऽपि । यस्मिन्नेव विचारप्रसंगे यो हि मुख्यः स एव स्वीक्रियते मुख्यत्वेन, नान्यः ।"

This consideration, of unity or multiplicity of a phoneme or a pada in different sentences or on different occasions, is based on different factors and needs. A different approach becomes necessary in a different context. But once a particular viewpoint is accepted, in a particular case, other viewpoints are naturally discarded from that consideration. Or, if a particular approach is adopted, then the other approaches become meaningless, in that case.

Thus a sentence, a pada, or a phoneme may be treated as a *unit* in different contexts, *i.e.*, in Linguistic, Grammatical, and Phonetic Contexts, respectively.

"वाक् की इकाई की दृष्टि से विचार के प्रसंग में वर्णभाग, वर्ण, पद, आदि की पृथक्-पृथक् चर्चा अलग-अलग कारण या आधार से की जाती है । इनमें से कोई विचारक जिस भी एक को विचार का आधार या मुख्य केन्द्र मान बैठता है, उसके लिए अन्य सबका विचार महत्त्वहीन हो उठता है । जिस प्रकार 'वाक्य' को वाग्व्यापार की इकाई स्वीकार करने के बाद अन्यों को वह महत्त्व नहीं दिया जा सकता, उसी प्रकार वर्ण, पद, आदि को व्यक्तिशः इकाई स्वीकार करने के बाद वाक्यादि अवशिष्ट अंगों को महत्त्व नहां दिया जा सकता । इसीलिए इस

विषय में वर्णवादियों, पदवादियों या वाक्यवादियों के अनेक मत प्रचलित हो गए हैं।"

टिप्पणी—यहां द्वितीयकाण्ड में वर्णित विविध मतमतान्तरों की ओर इंगित देकर उनकी मान्यता का वास्तविक आधार बताया गया है।

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः ।
ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते ॥७५॥

उच्चारणे ध्वनिकालमनुसृत्य ग्रहणे विषयस्याभिन्नकालत्वं स्थापयति:—

"तथाभूतस्य शब्दस्योच्चारणकालपरिसमाप्तावेव ग्रहणं जायते। उच्चारणे व्याप्तो ध्वनिकालो ह्रस्वदीर्घप्लुतादिभेदेन भिद्यते। ग्रहणे तु तस्य न किंचिदपि प्रयोजनम्। ग्रहणं तु खलु ध्वनेः शब्दस्य वाक्यस्य वा स्फोटरूपेणैव तत्क्षणं समकालं च जायते। तत्र ह्रस्वदीर्घप्लुतादीनां मात्राभेदः कमप्यन्तरं नैवादधाति। अभिन्न-कालत्वमेव स्फोटस्य शब्दस्य च ग्रहणे परमैकत्वं सूचयति। ग्रहणं तु तस्य युगपदेव जायते।

"कथं पुनः शब्दार्थस्य वाक्यार्थस्य वा विस्तारात्मको विचारो, यत्पर्याप्तकालपर्यन्तमपि ग्रहीतुर्मानसं न त्यजति। वृत्तिभेदमस्य कार-णम्। वृत्तिः खल्वलौकिकोऽर्थविचारः। सूत्रवृत्तिमिव शब्दस्य वाक्यस्य वापि वृत्तिमेव तदाश्रितं विचारभेदहेतुमाहुः। ग्रहणकाले देशकालावस्थादिभेदेन वृत्तिरपि भिद्यते। अतएव क्षणेन गृहीतोऽपि स्फोटरूपोऽर्थो वृत्तौ विस्तारभेदेन भिद्यते।"

As the principal word-self is eternal, the effect of the time-factor is, in no way, seen in the reception or duration of Sphoṭa. But because the form of the object, and thereby of its reflection, *i.e.*, Sphoṭa, is perceived as indifferent and mixed up with the sounds, therefore the duration of the sounds is taken as the duration of the sphoṭa. And it is therefrom that the sphoṭa

is supposed to be of varying speed and length, as far as the time-factor is concerned.

But in reality, Sphoṭa is instantaneous and unchanging.

"शब्द या वाक्य के उच्चारण में जो काल लगता है, वह वर्णध्वनि के ह्रस्व-दीर्घादि भेद के कारण होता है। उसे **ध्वनिकाल** कहा जाता है। पर शब्द या वाक्य का ग्रहण **स्फोट** के रूप में होता है। वह स्फोट एक ही क्षण में, विस्फोट जैसे रूप में, होता है। भले ही उसे उपलब्ध कराने वाला शब्द या वाक्य कितनी ही काल-मात्रा या देर में बोला गया हो। वक्ता का कथन समाप्त होने के क्षण में ही ग्रहीता को युगपत् प्रतीति हो जाती है।

"पर इस युगपत् प्रतीति का अर्थ यह नहीं कि ग्रहण की प्रक्रिया इस स्फोट की उपलब्धि के साथ ही समाप्त हो जाती है। वास्तव में स्फोट रूप में ग्रहण के बाद विचार-विस्तार का काल आता है। उसी वाक्य की जो विविध अनुभूतियां ग्रहीता के मन में उठती हैं, उन्हें केवल शब्दाश्रित नहीं कहा जा सकता। अतः उन्हें 'अर्थ' न कह कर 'वृत्ति' कहा जाता है। सूत्र की वृत्ति की भांति इसमें शब्दों की सीमा से परे छिपे संभावना-लोक को ढूंढा जाता है। यह भेद मूलतः ग्रहणकाल में ग्रहीता की देशकालावस्थादि पर निर्भर करता है।

टिप्पणी:—महाभाष्य के 'स्फोटमात्रं प्रति निर्दिश्यते' की व्याख्या में भर्तृहरि स्पष्ट करते हैं : **'अध्वनिकः स्फोट इत्युक्तं भवति।'** इसे ही इसी काण्ड में आगे चलकर भी स्पष्ट किया है।

स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते ॥७६॥

किमभिप्रेतं ध्वनिकालेनेति तद् विवृणोतिः—

"ह्रस्वदीर्घप्लुतादीनां कालमात्राभेदेन स्वभावो भिद्यते। तच्च भिन्नत्वं नित्यम्। तेषामुच्चारणे व्याप्तां कालमात्रामेवानुसृत्य शब्दस्याकृतेर्लघुत्वं दीर्घत्वं वा विनिश्चीयते। अतस्तस्योच्चारणे हेतुभूतायाः प्राकृतध्वनेः काल एव 'शब्दस्यायं काल' इत्यनेन रूपेण गृह्यते।"

The *short*, the *long* and the *protracted* forms of the sounds

are different in nature. That difference is of permanent nature. The word being eternal, and its primary sounds remaining unchanged, the duration of the primary sounds, involved in its pronouncement, is supposed to be the duration of the word itself.

But 'word' as such has no problem of time-factor being involved.

"ह्रस्व, दीर्घ, प्लुत आदि भेद ध्वनियों के हैं। अतः उन पर आश्रित शब्द के उच्चारण में जो कम या अधिक काल लगता है, उसे 'ध्वनिकाल' के रूप में कहा जाता है। यही शब्द-काल है। इस भेदयुक्त ध्वनि को 'प्राकृत ध्वनि' भी कहा जाता है।"

वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥७६ (क)॥

अयं श्लोको बहुषु प्रतिष्वधिकं पठ्यते। अत्र प्राकृतवैकृतध्वनिभेदौ प्रसंगात् व्याख्यायेते :—

"वर्णस्योच्चारणे उच्चरितस्य ग्रहणे च योऽसौ ध्वनि हेतुभूतो गृह्यते, स प्राकृतध्वनिनाम्ना कथ्यते। परं प्राकृतध्वनिव्यतिरिक्तं यदपि ग्रहणे हेतुभूतं तद् वैकृतध्वनिनाम्ना ज्ञायते। कुत एतत् ? यतो हि तस्मिन् वृत्तीनां भेदाः प्रतायन्ते, न खलु वर्णानामिन्द्रियोद्भूता ध्वनयः।"

The *primary* or natural sound is the cause of the perception of the word. The *secondary* or articulated sounds cause the difference in that perception. The secondary sounds are supposed to come into existence, only after the perception of the Sphoṭa.

"उच्चरित वर्णमात्र के ग्रहण में हेतु ध्वनि **प्राकृतध्वनि** के नाम से कहा जाता है, जबकि इससे भिन्न स्थिति में उसके ग्रहण, या उसके वृत्तिभेद के ग्रहण, में हेतुभूत तत्त्व को **वैकृत ध्वनि** कहा जाता है। यह ध्वनि प्राकृतध्वनि से भिन्न होती है।"

टिप्पणी :—हमने इसे इसलिए प्रामाणिक माना कि इससे पूर्ववर्त्ती और उत्तरवर्त्ती कारिकाओं में क्रमशः प्राकृत और वैकृत ध्वनि की चर्चा आई है, जबकि उसकी परिभाषा इसी एक कारिका में है। इस कारिका को कुछ विद्वानों ने व्याडि की रचित स्वीकार किया है।

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥ ७७ ॥

वैकृतध्वनेः वास्तवं स्वरूपं विवृणोति :—

"उच्चारणसमकालमेव स्फोटरूपेण शब्दस्य वाक्यस्य वा ग्रहणं भवति। परं दृश्यते हि ततोऽप्यधिकं किंचिद्, यत् तदनन्तरमपि वृत्तिभेदमर्थविस्तारभेदं वा जनयति। सत्यमेवास्मिन् हेतुः प्राकृतो ध्वनिर्भवितुं कथमपि नार्हति। अतो विस्तरणशीला विस्तारहेतवश्चैते ध्वनयो वैकृता एव, ये समूह्य वृत्तिभेदं जनयन्ति। नैतेषां सम्बन्धो यत्किंचिदपि उच्चारणकालोत्पादिना ध्वनिना सह। अर्थविस्तारं वृत्तिभेदं वा कृत्वाप्येते स्फोटस्य महत्त्वं यथाकथंचिदपि न आक्रमन्ते। स्फोटेन च तेषामभिन्नत्वमेव सिद्ध्यति, तस्यैव विवरकत्वात्।"

After the manifestation of the word by way of Sphoṭa, these secondary or reverberating sounds cause variations in the perception, they themselves being intimately related with the mind, and thus give a false impression of causing the variation in the Sphoṭa itself. But sphoṭa, being eternal itself, does not respond to these variations, and remains unchanged and undivided.

Note. It is our suggestion, after a careful study of Bhartṛhari's statements, that this Vaikṛta Dhvani may very well be taken in the sense of the 'power of suggestion', lying latently in the words.

"प्राकृत ध्वनि केवल वर्णोच्चारण में समर्थ होती है। शब्द या वाक्य के रूप में अभिधेय के पूरा होने पर उनका ग्रहण स्फोट के रूप में होता है। स्फोट सक्षण होता है। परन्तु उसकी उपलब्धि होते ही वक्तव्य या अभिधेय की

स्पष्टता वृत्तिभेद के रूप में पर्याप्त देर तक भी अनुभूत होती रहती है। तरंगों के रूप में प्रवाहित होने वाले इस विस्तार को जन्म देने का हेतु **वैकृत ध्वनि** है, जो स्थितिभेद और वृत्तिभेद का निमित्त बनती है।"

टिप्पणी :—'ध्वनि' के इस रूप के विवेचन के लिए अधिक देखें, इसी काण्ड के श्लोक संख्या ९३, ९४, १०२, १०३, १०६। इन सभी में आलंकारिकों की 'ध्वनि' के सदृश ही **वैकृत ध्वनि** की स्थिति मानी गई है।

इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य वा।
क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम्॥ ७८॥

अधुना ध्वनिमाश्रित्याऽभिव्यक्तिवादिनां त्रयो विवादाः वर्ण्यन्ते—

"एकेषां मते ध्वनिभिरिन्द्रियाणामेवोच्चारणात्मको श्रवणात्मको वा संस्कारो जायते। अन्येषां मते शब्दे ह्येव काचिन्नवीनताऽऽधीयते। प्रथममते नवीनतेयं 'रूपात्मिका', द्वितीये च 'अर्थात्मिका'। परमस्ति तृतीयमपि मतं, यस्मिन्नुभयात्मको व्यापारो ध्वनेः स्वीक्रियते—रूपात्मकसंस्कारमयोऽर्थात्मकसंस्कारमयश्च। वक्रोक्तिरूपेण काकुध्वन्यादिकं मन्यमानैरालंकारिकैस्तेषु त्रिषु प्रथममेव मतं सम्पुष्टम्। वस्तुरसालंकारादिध्वनिभेदान् गणयद्भिः काव्यशास्त्रिभिः शब्दे ह्येव कश्चन नव्यश्चमत्कारोपस्थितिः स्वीक्रियते। अपरे पुनः शब्दार्थावुभावप्याश्रित्य ध्वनिप्रभावमुभयात्मकं मन्यन्ते। प्रयोजनं च सर्वेषामिदमेव—यत् ते ध्वनिद्वारा शब्दस्य द्योतनव्यापारं विस्तृतं भवन्तं मन्यन्ते।"

The Expressionists differ on the effect of these sounds, having three different *schools*. According to the *first*, its major effect is mechanical one. According to them, it affects the hearing mechanism, producing variations therein. According to the *second*, it affects the nature of the word itself, producing thereby a change in its 'meaning and suggestivity'. The *third* is a synthesis of these both, accepting variations in 'mechanical' as well as 'semantic' aspects of the word, and thereby giving a new dimension to its expressional capabilities.

"ध्वनि का आधार लेकर चलने वाले अभिव्यक्तिवादियों के तीन वाद या मत मुख्य हैं। एक के अनुसार काकु आदि में परिवर्तन के द्वारा जो अभिव्यंजना में अन्तर आता है, वह इन्द्रिय के संस्कार के द्वारा ही आता है। अतः उनके मत में ध्वनि केवल **इन्द्रिय** का ही संस्कार करती है। इसमें एक भावना ग्रहीता के इन्द्रियसंस्कार की भी ली जा सकती है। **द्वितीय** मत के अनुसार ध्वनियों के द्वारा शब्द में ही कुछ ऐसा संस्कार कर दिया जाता है कि उसका अर्थ ही पलटता सा नज़र आता है। मानो वह शब्द ही नया बन गया हो। **तीसरा** मत इन दोनों मतों की खण्डात्मक सत्यता को स्वीकार करके बढ़ता है। उसके अनुसार ध्वनि में **वक्ता** का प्रयत्न और उसकी भावना का अन्तर भी समवेत है, जबकि **श्रोता** का ग्रहणव्यापार तो उससे प्रभावित होता ही है। परन्तु प्रयोजनात्मक दृष्टि से तीनों मत इस रूप में एक हैं कि उनका लक्ष्य स्फोट-ग्रहण के बाद होने वाले शब्द के भावनात्मक विस्तार को लक्षित और स्वीकृत करना है।"

टिप्पणी—'नाद' और 'ध्वनि' में अन्तर को अधिक समझने के लिए देखें—'भाषा० वाक्य०', पृ० ५०, अनुच्छेद ५०।

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः।
विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये ॥ ७९ ॥

इन्द्रियशब्दयोः संस्कारमेव विवृणोति :—

"यथा ध्यानसमाधानेनाञ्जनादिभिर्वा बुद्धिचक्षुरादीन्द्रियाणामेव संस्कारो विधीयते, तानि च ज्योतिर्ग्रहणे समर्थानि भवन्ति, तथैव विषयस्यापि संस्कार आवश्यकोऽस्ति। संस्कारहेतोरेव कोऽपि विषयः स्वगन्धप्रतिपादनं चारुतयोत्कृष्टतया च विदधाति। अतः सिद्धं यदुभयात्मक एव व्यापारो ध्वनिनाऽभीष्टः। ग्रहणसामर्थ्योत्कर्षरूपो य इन्द्रिये संभवति। प्रतिपादनचमत्काररूपश्च यो विषयमात्रे हि व्यवतिष्ठते।"

By concentrating, or by applying an eye-medicine, we increase the capability of our visual organ (*i.e.*, eye) only. But by perfecting or refining the object, we make it more easily perceptible, so that we may experience fully the smell in it.

"ध्वनिजन्य इन्द्रियसंस्कार का वही प्रभाव होता है, यथा समाधान और आँजने आदि के द्वारा चक्षु या बुद्धि आदि इन्द्रिय की सामर्थ्य, ग्रहण की दृष्टि से, तीव्र हो जाती है। इसी प्रकार उसके द्वारा होने वाले शब्दसंस्कार या विषयगत संस्कार का यह अर्थ होता है कि ध्वनि द्वारा हम विषय में प्रतिपादन की सामर्थ्य को अधिक उत्कृष्ट और व्यापक कर देते हैं। इस प्रकार ध्वनि का प्रभाव उभयात्मक स्वीकार करना ही ठीक है। क्योंकि प्रतिपादन और ग्रहण दोनों की सामर्थ्य में अन्तर या विस्तार होता है।"

टिप्पणी :—अगले श्लोकों में इसे और स्पष्ट किया गया है।

चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि।
विषयेन्द्रिययोरिष्टः संस्कारः सः क्रमो ध्वनेः॥ ८०॥

कथमुभयोः संस्कार इष्ट इत्युपस्थापयति :—

"चक्षुरिन्द्रियेण यः कश्चिदपि पदार्थो गृह्यते। चक्षुश्च तस्य प्राप्त्यां साधनभूतमेव स्वीक्रियते। परं तेनोद्भूतं ग्रहणमपि तदैव सम्पन्नं भवति, यदा तेजसा चक्षुरिन्द्रियस्य दृश्यमानविषयस्य च दर्शनप्रकाशनात्मकौ व्यापारौ प्रकृष्टतरौ संस्कृतौ च भवतः। इदमत्राभिप्रेतं यत् तेजसा खलु द्वयोरेव सामर्थ्यवर्धनं भवति, इन्द्रियस्य द्रव्यस्य च। तेजसोऽपि द्विविधः प्रभावोऽत्र वर्णितस्तस्य स्थितिर्वा द्विविधा वर्णिता : चक्षुषि दृष्ट्यात्मना स्थितम्, विषये द्रव्ये वा स्वात्मप्रकाशनरूपेण स्थितम्। दर्शनक्रियाया इदमुभयात्मकमस्तित्वमाधुनिकानां वैज्ञानिकानां कृतेऽपि विचारार्हम्।

"एवमेव ध्वनेरपि द्विविधः प्रभावः—इन्द्रियात्मको विषयात्मकश्च। उभयोरपि नवशक्त्याधानं तेन क्रियते। स एव तेन कृत्याः संस्कारः।"

When we say that in the process of expression the effect of sounds (or Dhvanis) is seen simultaneously on the Ear and the Word alike, we are taking the clue from the twofold effect of the Ligtht. Tejas or light-element enhances the recep-

tive capability of the eyes on the one hand, while on the other it glorifies the object as well, making it more receptible. And, it is all done simultaneously.

"चक्षु द्वारा ग्रहण की प्रक्रिया में **तेजस्** का प्रभाव उभयात्मक देखा जाता है। एक ओर उसके द्वारा इन्द्रिय (चक्षु) की शक्ति बढ़ती है, अर्थात् वह अधिक अच्छी तरह देखने में समर्थ होती है; और दूसरी ओर उसके द्वारा पदार्थ की स्वात्मप्रकाशन की सामर्थ्य में अन्तर आता है। इस प्रकार 'तेजस्' की उपस्थिति और उसका संस्कार **इन्द्रिय** और **द्रव्य** दोनों में देखा जाता है।

"यही बात 'ध्वनि' के प्रभाव के विषय में भी संगत बैठती है। ध्वनि का प्रभाव वक्ता और श्रोता की उच्चारण और ग्रहण में रत इन्द्रियों के संस्कार के रूप में भी होता है, एवं स्वयं विषय की ग्राह्यशक्ति में भी परिवर्तन या परिशोधन होता देखा जाता है।"

टिप्पणी :—उभयात्मक प्रकाशन व्यापार का यह सिद्धान्त वैज्ञानिक दृष्टि से अत्यधिक आधुनिक प्रतीत होता है।

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते।
कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः प्रकल्पितः ॥८१॥

ध्वनेर्ग्रहणविषये सिद्धान्तमुपस्थाप्य मतभेदमपि प्रदर्शयति—

"ध्वनेर्ग्रहणमविभागेन स्फोटरूपेणैव संभवतीत्युपस्थापना। अविभक्त एव स्फोटः। तेन गृहीता ध्वनिरप्यविभक्ततयैव गृह्यते, ग्रहणानन्तरं तत्र वर्णपदाद्यवच्छिन्नायाः प्रतीतेरसंभवात्। उच्चारिता या ध्वनिर्गकारौकारविसर्गादिरूपेण विभक्तोवावभाति, ग्रहणे तस्याइताद्रूप्यं नैवावतिष्ठते; बुद्धौ तस्य एकत्वाधानात्।

"अविभक्तोऽयं ध्वनिः कैश्चन विद्वांसैः स्फोटादभिन्नतया पृथक्त्वेनाऽगृह्यमाणो ऽननुभूयमानो वा स्वीक्रियते। अन्ये पुनरेनं स्फोटात्पृथक्तया स्थितं मन्यन्ते।"

According to some, Dhvani (sound) is cognised as one with the Sphota. Others think that Dhvani is not per-

cieved at all. While some others think that it is perceived as a separate entity.

Thus, there are three distinct theories in this regard. Or, we can very well say that here Bhartṛhari explains the reality at first, and then recounts two differing theories, at variance with the original.

"ध्वनि का ग्रहण स्फोट से अविभक्त रूप में रहकर ही होता है। इस पर भी कुछ विद्वान् ध्वनि का न तो अस्तित्व पृथक् से स्वीकार करते हैं, ना ही वे उसे पृथक् से अनुभूति का विषय मानते हैं। किन्तु कुछ अन्य विद्वान् ध्वनि की सत्ता स्फोट से पृथक् स्वीकार करते हैं, भले ही उनका ग्रहण स्फोट के ग्रहण से अविभक्त होकर ही रहता हो।"

टिप्पणी :—इस कारिका में तीन मतों की उपस्थिति न मानकर, एक सत्य के दो मतभेदों का ही वर्णन किया गया है। इसे यूँ कहा जा सकता है:—

ध्वनिग्रहण स्फोट से अविभक्त

ध्वनि पृथक् से असंवेद्य | पृथक् से संवेद्य (स्वतन्त्र)

अर्थात्, एक मत के अनुसार ग्रहण ध्वनि का न होकर **स्फोट** का होता है; ध्वनि उसी में अन्तर्गृहीत हो जाती है। दूसरे के अनुसार स्फोट से अपृथक् रहकर भी ध्वनि ग्रहण काल में स्पष्टतः अनुभूत की जा सकती है। अर्थात्, उस दशा में हम ध्वनि भी सुनते हैं, पर साथ ही स्फोट की उपलब्धि भी हमें होती है।

यथानुवाकः श्लोको वा सोढत्वमुपगच्छति।
आवृत्त्या, न तु स ग्रन्थः प्रत्यावृत्ति निरूप्यते ॥८२॥

प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥८३॥

"यथा मन्त्रसमूहः श्लोको वा ग्रन्थस्य श्लोकस्य वा पुनः पुनरावृत्तौ स्मृतिपथमुपयाति, व्याख्या वा तस्य स्वत एव ज्ञायते, तथैव पुनः पुनः श्रूयमाण उच्चार्यमाणो वा शब्दः बुद्धौ स्वरूपेणाऽवधार्यते। पृथक्शः

आवृत्त्या यथा कश्चिदेकः श्लोकः ग्रन्थस्यार्थं, तदङ्गतया स्वार्थंवा नैव प्रकाशयितुं समर्थो भवति, तथैव एकवारमात्रमेव एकैकशो वा पठनेन श्रुत्या वा शब्दे स्वरूपं नैवाऽवधार्यते । ग्रन्थे ऽनुवाके वा पुनः पुनः पठिते तस्मिन्नेकत्वबुद्धिप्रतिष्ठा जायते । तदा च कस्यापि श्लोकस्य तदङ्गतयाऽर्थो विज्ञायते । पृथक्त्वे च तस्य तथाभूतो ऽप्रसंगोत्पादितो ऽर्थो नैव ज्ञायते । एवमेव तत्तत्प्रसंगे प्रयुज्यमानस्य शब्दस्याऽव्याख्येयैः ग्रहण-गुणेन च संयुक्तैः प्रत्ययैः पूर्वोपचितबुद्धिभिर्वा तस्मिन् स्वरूपात्मिका प्रत्यभिज्ञा ऽवधार्यते । स च शब्दो उच्चारितैरनुस्यूतैरनुभूतैश्च ध्वनिभिरेव प्रकाशतामुपयाति । पुनः पुनः श्रूयमाणा ध्वनयस्तस्य स्वरूपं बुद्धौ स्थिरीकुर्वन्ति । अर्थभावना च तस्य तत्तत्प्रसंगे प्रयुज्यमानतया जातैः कैश्चित्प्रत्यायनैः संकेतैः स्थिरीभवति । अन्यथा प्रसंगेनावृत्त्या च हीनः शब्दो न कञ्चनाप्यर्थं वहति ।"

Just as a Vedic passage (anuvāka) or a verse becomes palatable or is well fixed in the reader's mind only after frequent repetitions, and as it is not fully grasped or crammed in the very first or in each individual repetition.

In the same way, the real form of the Word is fixed in our mind, when that is pronounced in the form of different phonemes or sounds. But this perception or fixation of the word becomes possible only because we are already having some definite cognition, based on certain unaccountable or unexplainable, but still favourable, signs.

Even when the real form of the whole word is manifested, as long as it has no definite cognition, it is as good as unperceived.

"यथा ग्रन्थ-प्रसंग में या पृथक्शः पुनः पुनः पढ़ने से कोई भी श्लोक या अनुच्छेद ग्रहीता के लिए ग्रहण-योग्य हो जाता है, किन्तु अकेला और प्रसंगव्यतिरिक्त पढ़ने पर वह ग्रन्थसंदर्भ से संयुक्त भावना की प्रतीति नहीं देता, उसी प्रकार कोई शब्द भी सप्रसंग पुनः पुनः पढ़े जाने पर ग्रहणक्रिया में सहायक किन्ही अव्याख्येय चिन्हों या प्रतीतियों के द्वारा अपने स्वरूप को वक्ता और श्रोता की बुद्धि में स्थिरकर लेता है । अर्थात् उन-उन प्रतीतियों के रहते उसका स्वरूप अविकल ही रहता है । ध्वनियां उसके उसी स्वरूप को बाह्य रूप में अभिव्यक्त करती हैं । "अमुक

ध्वनियों के द्वारा उच्चारित शब्द अमुक भावना को व्यक्त करता है", यह बात भी पुनः पुनरावृत्ति के ही कारण ज्ञात होती है।"

टिप्पणी :—पुनः पुनः आवृत्ति के दो परिणाम बताए गए हैं:—
—ध्वनिरूप शब्द का स्वरूप-स्थिरण, और
—प्रसंगमय आवृत्ति से उसका अर्थ से सम्बन्धस्थिरण।

नादैराहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥८४॥

तदेव विवृणोति—"उच्चारणव्यापारे यो ध्वनिरिति कथ्यते, स एव ग्रहणव्यापारे नादनाम्नाऽभिधीयते। उच्चारणे प्रथमध्वनेरारभ्यान्त्यध्वनिपर्यन्तं यदपि शब्दरूपेणोच्चार्यते, तदेव समकालमेवनादैर्गृह्यते। नादस्योपस्थितिः श्रवणक्रियायां प्रधानाङ्गतया स्वीक्रियते। यतो हि तैर्विनोच्चारितानां ध्वनीनां स्वरूपेण ग्रहणमेव न संभवति। ग्रहणमवधारणं चेदं शब्दस्य बुद्धावेव भवति।

"कथंभूता सा बुद्धिरिति विशेषयन् प्राह—'आहितबीजायाम्'। उक्तमेव यदावृत्तिपौनःपुन्येन शब्दस्य स्वरूपबीजं बुद्धौ स्थिरत्वेनाहितो भवति। आहितबीजा चेयं बुद्धिस्तस्यैव शब्दस्य पुनःपुनरुद्भूतमुच्चारणं श्रावं श्रावं तच्छब्दविशेषविषये आवृत्तपरिपाका जायते। तथाभूतायामावृत्तपरिपाकायामाहितबीजायां च बुद्धौ स एव शब्दोऽन्त्यध्वनिसमकालमेव गृह्यमाणेन नादेन पुनर्जागृत इवाऽवधार्यते ज्ञायते च।"

The sounds, along with the final sound produced, manifest the word in its real form. This manifestation happens in our mind. It is possible, only because we had a seeding of it already in our mind, which has been nursed and cultured by every repetition.

Here we must differentiate in between Nāda and Dhvani. While Dhvani stands for the sound produced by the speaker, the Nāda represents sounds received by the listener. Thus, these

may be taken as two distinct technical terms, denoting two different situations and roles of the same 'sound'.

"पहले से ही जिसमें उस शब्द-विशेष के भावनात्मक बीज विद्यमान हैं, तथा जो उस शब्द के पुनः पुनः उच्चारण और श्रवण से उससे सम्बद्ध परिपक्वता प्राप्त कर चुकी है, ऐसी बुद्धि में अन्तिम उच्चरित ध्वनि के साथ-साथ पूर्ण होने वाले नादात्मक ग्रहण के साथ ही वह उच्चरित शब्दविशेष फिर से स्वरूप में स्थित होकर समझा जाता है। अर्थात्, प्रत्येक उच्चारण के समय उसका स्वरूप-ग्रहण नए सिरे से नहीं होता, बल्कि वह शब्द बार-बार के उच्चारण और श्रवण के कारण वक्ता और श्रोता की बुद्धि में पहले ही अपना स्वरूप स्थिर कर चुका होता है। अब तो फिर से सुनाई देने पर अन्तिम ध्वनि के उच्चारण के समकाल ही उसका नादात्मक ग्रहण पूरा होने पर उसकी भावना और स्वरूप फिर से स्पष्ट हो जाते हैं।"

टिप्पणी :—ध्वनि और नाद एक ही तत्त्व के उच्चारणात्मक और ग्रहणात्मक दो पार्श्व हैं।

असतश्चान्तराले यान् शब्दानस्तीति मन्यते ।
प्रतिपत्तुरशक्तिः सा ग्रहणोपाय एव सः ॥८५॥

स्फोटोद्भूते ध्वन्यात्मके व्यापारे प्रोच्चारितपदार्थातिरिक्तं यत्किंचिदपि ज्ञायते, तत्किमनुच्चारितानां केषांचन शब्दानामभिप्रेतमथवा अदृष्टसत्तया तत्तत्र स्थितमिति विवेच्यते—

"गतश्लोकेऽन्त्यध्वनेरयमप्यर्थो भवितुमर्हति 'या खलु स्फोटान्ते जायते, तद्ग्रहीतं च वस्तु विस्तारयति—अनेकव्यक्त्यभिव्यंग्यत्वात्'। आलंकारिकाणां सा ध्वनिर्यानर्थानभिव्यनक्ति ते खलु कानिचिच्छब्दार्थानन्तर्हित्य स्थिता इव प्रतीयन्ते। एतेनैव यदि कश्चिदनुमेयाद् यत्सन्ति केचनान्तर्हिताः शब्दास्तत्र शरीररहितत्वेन स्थिताः, स भ्रमोपजीवी स्वकीयामशक्तिं नैव जानाति। तेषां प्रतीतिर्ग्रहणोपायत्वेनैव जायते। अन्यथा वाक्यार्थग्रहणे तु अन्तराले स्थितानां शरीरिणां पदानां पदार्थानां चापि सत्ता नैव स्वीकर्त्तव्या स्फोटवादिभिः। कथं पुनस्तेषां पदानां पदार्थानां वा, ये शरीरतयाऽपि तत्र नैव विद्यन्ते।"

अनेन वाक्यार्थस्यैकत्वमखण्डत्वं च सूचितं, पदानां च सापेक्षिकमेव सत्तास्वीकरणम् । अनेनैव वर्णादीनामपि पृथगस्तित्वस्वीकरणं सहेतुकं निरस्तम् ।

उपायमधिकृत्य हरिरन्यत्र कथयति—**'उपादायापि ये हेयास्तानुपायान् प्रचक्षते ।'**

When one believes those non-existant words or padas as existing ones, which appear to be coming in the midst of the pronounced sentence, it is due to the incapability of the receiver or perceiver, who cannot see a thing as a 'whole'. The 'parts' are not real ones ; because there they exist only due to that 'whole' and not because of their own standing. Thus they exist there only as a '*means*', and not as an '*end*'.

According to Bhartṛhari, a 'means' is that which becomes useless after the aim is achieved. And, this perception of the words becomes meaningless, when the 'meaning of the statement as a whole' becomes clear.

The same is true about the phonemes in a word, or the phoneme-parts in a phoneme.

"वाक्यार्थ एक और अविच्छेद्य है, इस सत्य को स्वीकार करने के बाद तथाकथित वाक्यशरीर के अन्तर्गत पदों और पदार्थों की सत्ता मानना ही भ्रामक हो जाता है। यही बात वर्णध्वनियों की सत्ता के सम्बन्ध में भी सत्य है। आलंकारिकों की ध्वनि के द्वारा प्रतीयमान अर्थ में जिन अविद्यमान शब्दों या शब्दार्थों की अतिरिक्त कल्पना हम कर बैठते हैं, वह प्रतिपत्ता या ग्रहीता की अपनी अशक्ति का प्रतीक है; क्योंकि उन तथाकथित पदों या पदार्थों की सत्ता केवल समझने-समझाने के उद्देश्य से ही स्वीकार की जाती है। उनका वास्तविक अस्तित्व या महत्त्व कुछ भी नहीं होता।"

टिप्पणी :—इससे वाक्यार्थ की अखण्डता और पदों की पराश्रित सत्ता का आभास मिलता ही है। ग्रहण में 'उपाय' भर्तृहरि ने साभिप्राय कहा है। उनकी दृष्टि में 'उपाय' वह है जिसे सहायतार्थ प्रयोग तो किया जाता है, किन्तु प्रयोजन पूरा होते ही जिसे त्याग भी दिया जाता है।

भेदानुकारो ज्ञानस्य वाचश्चोपप्लवो ध्रुवः ।
क्रमोपसृष्टरूपा वाग् ज्ञानं ज्ञेयव्यपाश्रयम् ॥८६॥

वाचो ज्ञानस्य च भेदोपग्रहः स्वाभाविक इति विवेचयति—

"यथा एकमखण्डमपि ज्ञानं ज्ञेयविषयानुषङ्गत्वात् तत्तद्भेदसंयुक्तं विभक्तमिव वा दृश्यते, तथैव अक्रमाऽपि वाग् नादस्फोटादिभेदाद् वर्णपदादिभेदाद् वा क्रमवतीव लक्ष्यते । अतः खण्डात्मकत्वावभासेन ज्ञानस्य भेदानुबन्धित्वं वाचश्च विभक्तरूपवत्त्वं च स्वाभाविकं निश्चितं च ।"

The seeming divisibility of the one and indivisible **Knowledge** and the apparent intradivisibility of **Speech** are the realities to be reckoned with, though illusory also at the same time. It is so, because the indivisible knowledge is dependent on its subject, or 'the known', which *varies* in each case, and because the indivisible Speech is dependent, for its own expression, on sound production, which involves 'order'. Naturally, as a result, the knowledge and the speech take their colour from their basic factors, *i.e.* the subject and the orderly production, respectively. Hence their apparent *divisibility*.

"**ज्ञान** अपने स्वरूप में अखण्ड होकर भी ज्ञेय या विषय पर आश्रित होने के कारण भेदोपभेद में विभक्त सा दिखाई देता है । **वाक्** भी अक्रम और अखण्ड है । किन्तु, प्रत्यक्ष उपलब्धि में वह भी नादस्फोटादि के कारण, या वर्णपदादिभेद के कारण, क्रमवती या खण्डवती सी दिखाई देती है । इस प्रकार खण्डात्मक अवभास के असत्य होने पर भी व्यवहार में इन भेदों का अस्तित्व स्थिर और स्वाभाविक सा प्रतीत होता है ।"

टिप्पणी :—'ज्ञानं ज्ञेयव्यपाश्रयम्' में ज्ञेय की विविधता के कारण ज्ञान की प्रत्यक्ष अनेकविधता का संकेत है ।

व्याडि का यह वचन अवधेय है :

ज्ञेयेन विना न ज्ञानं व्यवहारेऽवतिष्ठते ।
नालब्धक्रमया वाचा कश्चिदर्थोऽभिधीयते ॥

यथाद्यसंख्याग्रहणमुपायः प्रतिपत्तये ।
संख्यान्तराणां भेदेऽपि तथा शब्दान्तरश्रुतिः ॥८७॥

ग्रहणोपायत्वं विवृणोति —"यथा शतमित्युक्ते नैवास्ति कार्यं शतपूर्वया कयापि संख्यया, तथापि तासां परिज्ञानेन शतस्यापि ग्रहणं सारल्येन संभवति, तथैव वाक्यार्थवाचके वाक्यरूपे प्रोच्चरितेऽपि नैवास्ति कार्यमन्यैरन्तर्वर्तिभिर्वा पदैः पदार्थैश्च । एवं स्थितेऽपि तेषां परिकल्पनया वाक्यार्थग्रहणे सौकर्यं भवत्येव ।"

Just as the cognition of the earlier numbers is the means to understand the real number in question ; though their cognition is meaningless otherwise and though they differ from one another. In the same way, the understanding of the interlying words or sounds is the means to understand the sentence, or the meaning thereof, though their cognition may howsoever be illusory.

"जिस प्रकार 'सौ' कहने पर उससे पूर्ववर्त्ती संख्याओं का प्रयोजन नहीं रहता, पर फिर भी उनके परिज्ञान से 'सौ' के जानने और समझने में सरलता होती है ; उसी प्रकार वाक्य और वाक्यार्थ के एक और अखण्ड होने के कारण उसे समझने के लिए उसमें खण्ड रूप में स्थित या उसके बाहर स्थित किन्हीं शब्दों के ज्ञान की आवश्यकता नहीं है। फिर भी यह सत्य है कि इस प्रकार के शब्दों के अस्तित्व को स्वीकार करने या उनको मानने से वाक्यार्थ के ग्रहण का कार्य सरल हो जाता है। इसलिए असत्य होते हुए भी इस प्रकार की खण्ड कल्पना को स्वीकार करना ही पड़ता है ।"

प्रत्येकं व्यञ्जका भिन्ना वर्णवाक्यपदेषु ये ।
तेषामत्यन्तभेदेऽपि प्रकीर्णा इव शक्तयः ॥८८॥

कथं पुनः वर्णवाक्यपदादीनां मिथः परस्परं वा भिन्नत्वं सिद्धयति—"अत्यन्तभिन्नानामपि वर्णवाक्यपदादीनां व्यञ्जका भिन्नाश्च शक्तयः प्रत्येकं पृथक्तया प्रकाशयन्त्योऽपि मिथः संकीर्णा इव दृश्यन्ते। अस्याऽयमर्थो यद् याभिः खलु शक्तिभिर्वाक्यपदवर्णानां मिथः परस्परं वा भिन्नत्वं ज्ञायते, याभिश्च हेतुभूताभिस्तेषां वाक्यपदवर्णादीनां परस्परमत्यन्तभेद उपलक्ष्यते, ताः परस्परं भिन्ना अपि शक्तयः विवे-

चनकाले व्यामिश्रा इव संकीर्णा इव वा दृश्यन्ते। 'प्रकीर्णा' इति पाठेऽपि 'व्यामिश्रा इत्येष एवार्थो ज्ञायते।"

Though the cognitory signs, manifesting the phonemes, words and sentences, are different in each case and are entirely different mutually as well, their manifesting powers appear to be confused due to their similarity in parts or in some special effects.

Hence the comprehension of parts in a phoneme, or phonemes in a word, and the words in a sentence which are indivisibly one otherwise.

"वर्ण, वाक्य और पद के रूप में भेद काल्पनिक और असत्य हैं। फिर भी उनकी पृथक्-पृथक् सत्ता बताने वाली और उन्हें परस्पर और एक-दूसरे से भिन्न सिद्ध करने वाली जो शक्तियां मानी गई हैं, वे परस्पर नितान्त भिन्न होने पर भी उन तीनों में ही संकीर्ण होकर व्याप्त होती देखी गई हैं। अर्थात्, वाक्यादि के परस्पर नितान्त भिन्न मान लेने पर भी और उनकी व्यंजक शक्तियों को नितान्त भिन्न रूप में स्वीकार करने पर भी उनमें पारस्परिक समानता और एकता के तत्त्व इतने अधिक हैं कि वे परस्पर उलझते से प्रतीत होते हैं।"

यथैव दर्शनैः पूर्वैर्दूरात्संतमसेऽपि वा।
अन्यथाकृत्यविषयमन्यथैवाध्यवस्यति ॥८९॥
व्यज्यमाने तथा वाक्ये वाक्याभिव्यक्तिहेतुभिः।
भावावग्रहरूपेण पूर्वं बुद्धिः प्रवर्तते ॥९०॥

अखण्डमेकं च रूपं कथं खण्डात्मकेन पथोपलब्धुं शक्य इति विवेचयति—"यथा सामान्या मनुष्याः प्रथमदृष्ट्यां वृक्षादीन् हस्त्यादि-रूपेण गृह्णन्ति, दूराद् हेतोः अन्धकारहेतोर्वा. तत्रैव स्थिताश्च क्रमशः सत्यां प्रतीतिमुपलभमाना यथावद् वस्तुं पश्यन्ति।

"तथैव भागहीने क्रमहीने च वाक्येऽपि तस्याभिव्यक्तिवेलायां तस्यैवांशभूतैरवयवैरिव पदवर्णादिभिस्तस्यार्थस्याभिव्यंजनं क्रियते। इयं चाभिव्यक्तिरंशग्रहणरूपेण स्वीक्रियते, यतो हि बुद्धिः पूर्वं भागा-

वग्रहरूपेणैव कस्मिंश्चिदपि विषये प्रवेशं प्राप्नोति ।"

सत्योपलब्ध्यां सत्यामिमे भोगा असत्यरूपतया नावतिष्ठन्ते, यथा वृक्षत्वमुपलभ्य हस्त्यादिप्रतीतेस्तत्रासत्यता स्पष्टीभवत्येव। पूर्वमन्यथा-ग्रहणेनान्यदेव परिणामावगमनं रीतिरेव ज्ञानस्य । भागावग्रहरूपेयं प्राग्बुद्धिस्त्याज्यैव जायतेऽन्ते । अत एवोपायत्वेन व्याख्याता ।

As, when looking from a distance or in the darkness, people generally mistake a thing in the previous cognitions, before taking them finally in their real and established form.

In the same way, during the manifestation of a sentence the intervening causes of that manifestation, *i.e.* phoneme and word etc. give their own cognition, as though the 'whole' is divided into 'parts' and is, therefore, being taken partwise only.

But this is nothing but a '*way*' to attain the ultimate *goal*, and therefore has no importance left, once the goal is attained.

"दूरी या अन्धकार आदि के कारण जिस प्रकार पहले हम सर्प या हाथी आदि की प्रतीति लेकर बाद में उनके रज्जु और वृक्ष होने का सत्य प्राप्त करते हैं, यद्यपि आरम्भिक प्रतीति असत्य होने से त्याज्य ठहरती है, उसी प्रकार अखण्ड और अक्रम वाक्य का आरम्भिक ग्रहण भी खण्ड या अंशरूप वर्ण, पद, आदि के माध्यम से ही होता हुआ दिखाई देता है । यद्यपि उसकी भी अन्तिम और सत्य प्रतीति 'स्फोट' के रूप में क्रम और भाग से रहित होकर सक्षण और युगपत् ही होती है ।"

असत्य उपायों का सहारा लेकर सत्य की ओर बढ़ने या उसे पाने की यह परम्परा निराली है । पर, होता ऐसा ही है ।

यथानुपूर्वीनियमो विकारे क्षीरबीजयोः ।
तथैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः ॥९१॥

उदाहरणेन प्रतिपत्तृबुद्धौ वर्णपदादिक्रमेण वाक्यग्रहणं पुष्णाति—

"यथा क्षीरस्य दधिविकारे काश्चित् प्रगाढतादयो ऽवस्था विशेषा मध्यवर्तिन्यो भवन्त्येव । यथा च बीजाद् वृक्षोत्पत्तौ पत्राङ्कुरादिक्रम-मुपपद्यत एव । स खलु आनुपूर्वीनियमो विद्यते पूर्वापरतया । तथैवैषाम-र्वाग्दर्शनानां प्रतिपत्तॄणां वाक्यार्थग्रहणेन पूर्वं वाक्यस्वरूपग्रहणाद्या-

वश्यकमेव । तस्मिंश्च वाक्यार्थे नियतक्रमपरिणामभागाकारप्रत्यवभासमात्रयुक्ता ग्रहीतॄणां बुद्धयः स्फोटैः प्रवर्त्तन्ते ।"

Just as there is a definite sequence in the transformation of milk into the curd and of seed into a tree, in the same way there is a definite sequence about the cognitions in the perceiver's mind.

We may call these cognitory sequences as the illusory divisions of the sentences or the words, or that of Prakṛti and Pratyaya, etc.

"जैसे दूध से दही और बीज से वृक्ष बनते हुए बीज की प्रगाढ़ता और अंकुरादि की अवस्थाएं पार करनी आवश्यक ही होती हैं, उसी प्रकार वाक्य से होने वाला स्फोट भी वर्णपदादिक्रम से या वाक्यावयवक्रम से सामने आता प्रतीत होता है । कम से कम गृहीता की बुद्धि को ऐसा ही विश्वास होता है ।"

भागवत्स्वपि तेष्वेव रूपभेदो ध्वनेः क्रमात् ।
निर्भागेष्वभ्युपायो वा भागभेदप्रकल्पनम् ॥९२॥

इयं भागभेदकल्पना केवलमुपायत्वेनैव स्वीकर्तुमर्हति, नान्यथा—

"भेदवादिनां कृते गौरित्येतत्पदं गकारौकारविसर्जनीयानामेव योगो, नान्यः कश्चन निर्भागः शब्दात्माऽस्ति तेषां मते । अनेनैव क्रमेण ते शब्दस्य नित्यत्वं मन्यन्ते, नान्यथा । ध्वनिक्रमस्तु तेषामपि कृते परं प्रमाणम् । यतो हि 'गवे' च 'वेग' शब्दे च ध्वनिक्रमेणैव स्वरूपभेदः । तथैव वर्णस्फोटवाक्यस्फोटादिष्वपि निर्भागेषु तेषां तथैव खण्डप्रतीतिस्वीकारः संभवति ।

परमिदमवधेयं यद् भागवत्त्वकल्पनमिदं सर्वं परिणामाधिगतौ केवलं त्यागयोग्यमुपायभूतमेव, न पुनः वास्तवम् ।"

Even if the words or sentences are supposed as having parts, it may be said that the differences in them are due to the sequence of the phonemes or sounds. Or, we can say, that though they are indivisible, still they are taken as divided into different parts ; because such a supposition enables us to catch

the reality of the indivisible things as well, which otherwise may seem impossible.

"मीमांसकादि अखण्डवादी होते हुए भी यह मानते हैं कि 'नदी' और 'दीन' या 'गवे' और 'वेग' में अखण्डात्मक अर्थानुभूति होते हुए भी उनका ध्वनिक्रम उनकी भिन्न-भिन्न प्रतीति में सहायता करता है। इस प्रकार वे भी खण्ड से ही अखण्डत्व की प्रतीति मानते हैं। यही बात वे वर्णस्फोट, वाक्यस्फोट, आदि के विषय में भी सत्य मानते हैं। अर्थात्, अखण्ड होते हुए भी खण्डात्मक अनुभूति उनकी प्रतीति का माध्यम बनती है।

परन्तु यह सब अन्ततः उपाय मात्र है; क्योंकि ग्रहण के बाद इनकी उपयोगिता ही नहीं रह जाती।"

अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृता।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥९३॥

स्फोटस्याविश्लिष्टं स्वरूपमुपस्कृत्य तस्यैव व्यक्ती ध्वनित्वेनोपस्थापयति—"स्फोटस्य परमं स्वरूपं जातित्वेन स्थितमस्ति। जातिश्च अनेकव्यक्तिसामान्यलक्षणोपेता समूहात्मिका च। स्फोटेऽपि यच्चित्रमेकत्वेन गृह्यते तस्मिन् सन्ति हि नानात्मिकाः संभावना अन्तर्हिताः। स्फोटस्तु ग्रहणस्य स्वरूपम्, न हि तेन तत्स्थानां व्यक्तीनामुपस्थितिर्निषिध्यते। समूहस्वरूपत्वेन स्थितमपि स्फोटात्मकं तत्त्वं समूहमिवान्तर्हितानां मन्यान्यद्रव्यानामपि वाचको ग्राहकश्च भवत्येव। यद्यपि तेषां ग्रहणं स्फोटानन्तरमेव पूर्णतया प्रकाशतामुपयाति, स्फोटस्य संघातैजन्यैकत्वात्। स्फोटचित्रेऽप्येकात्मके तस्य व्यक्तिरूपेणाविविक्ततया स्थिता अनेकव्यक्तयो वर्णपदाद्यर्थरूपत्वेन स्थिताः स्वतन्त्ररूपेण वा स्थिताः तदुपरिव्यज्यन्त एव। ता व्यक्तय एव कैश्चिद् विद्वद्भिः ध्वनिरूपेण स्थिताः कथ्यन्ते। तेषां मते वर्णनिर्मातारो ध्वनय एव तस्मिन् स्फोटे व्यक्तित्वमावहन्ति। यद्यप्यन्ये ताः व्यक्तीः खण्डचित्रात्मकत्वेन अर्थविस्ताररूपेण वा स्वीकुर्वन्ति। तेषां मते त एव विस्तारा आलंकारिकाणां ध्वनेः रूपेण स्थिताः स्वीकर्तुं योग्याः।"

Generally the Sphoṭa is supposed to be a compact and collective mass (*i.e.* Community=Jati), which becomes manifest with the help of a lot of individuals. But according to some scholars these individuals are nothing but sounds, taking part in its clarification or making. But this, latter, proposition is merely hypothetical, and there is no scope for sounds holding on their own, when the Sphoṭa has become manifest.

Note—For Dhvani, we have already said that it must stand for 'Vaikṛta Dhvanī' or the 'power of Suggestion', residing in a word or a sentence. But scholars take it as standing for 'sounds', produced in speech-formation.

ऊपर वैकृत ध्वनि की चर्चा में स्पष्ट है कि वृत्तिभेद का कारण वैकृतध्वनि ही होती है। यहां स्फोट की जातिमत्ता को समझाया गया है —

"स्फोट का स्वरूप 'जाति' ही होता है। अर्थात् उसके द्वारा उपलब्ध चित्र में एकत्व और सामान्यत्व की भावना होती है। पर इस जातिरूप के विवेचन में हम अनेक व्यक्तिरूपों को स्पष्ट होकर उभरता पाते हैं। वास्तव में स्फोट द्वारा गृहीत जातिरूप में ही वे सब व्यक्तिरूप अन्तर्गृहीत होते हैं। उनकी स्पष्टता स्फोट के बाद ही होती है: '**स्फोटादेवोपजायन्ते**।' कई विद्वान् इन व्यक्तिभेदों को ध्वनिकृत या ध्वनिरूप मानते हैं।"

टि०—ऊपर वैकृत ध्वनि की चर्चा आई है। अगले श्लोकों में भी वही चर्चा है। इस कारण ध्वनि का अभिप्राय हम 'वैकृत ध्वनि' ही अधिक उचित समझते हैं।

अविकारस्य शब्दस्य निमित्तैर्विकृतो ध्वनिः।
उपलब्धौ निमित्तत्वमुपयाति प्रकाशवत्॥९४॥

शब्दस्त्वविकृतो, ध्वनिश्च निमित्तैर्विकृतः। तयोः सम्बन्धं पुनरालोचयति—"निमित्तैः स्थानकरणाभिघातरूपैः स्वकारणैर्विकृतः समुत्पादितो ध्वनिरविकारस्य शब्दस्य ध्वनिकृतविकारादिरहितस्य स्फोटरूपोपलब्धौ प्रकाशवत्प्रदीपादिवद् वा निमित्तत्वमुपयाति।"

उक्तमेव च पूर्वं यत्प्रकाशकस्य धर्मो विषयस्येन्द्रियस्य च प्रकाशनात्मकः।

The word, is only one and indivisible and is not subject to any change, through the sounds modified due to various causes. But that 'Word' itself resides in the sounds. Those sounds act like a 'light', which, varying in colour and density, reflects the apparent variations in the reflexes, but does not basically change the real object itself. The variations of sounds at different occasions, in the same way, do not affect any real change in the original word, and its concept thereby.

"शब्द स्वयं बुद्धिस्थ रूप में नित्य और अविकृत है। प्रयत्न, स्थान, आदि के परिवर्तन के कारण, या ह्रस्वप्लुतादिभेद से, ध्वनि में विकार या अन्तर आता रहता है। परन्तु विकारशील होकर भी ये ध्वनियां उस अविकृत शब्द को ही प्रकाशित करती हैं। विकार का अर्थ बाह्यद्रुतादि वृत्तिकाल से भी लिया जाता है।"

टिप्पणी :—'वृत्तिकाल' का अर्थ हम पहले भी स्पष्ट कर आए हैं, और १०१वें श्लोक में भी चर्चा करेंगे।

न चानित्येष्वभिव्यक्तिर्नियमेन व्यवस्थिता।
आश्रयैरपि नित्यानां जातीनां व्यक्तिरिष्यते ॥९५॥

इत्येवं पूर्वोक्तान् विविधान् मतानुपस्थाप्य तेषां प्रतिकारं च कृत्वाऽधुनाऽभिव्यक्तेरनित्यत्वमुपस्थाप्य तत्परिहारं करोति—

"ध्वनयोऽनित्याः शब्दश्च नित्यः, इति स्वीकृतेऽपि शङ्क्यते यत्कथं घटादिरूपं नित्यतया ग्रहीतुं शक्यते। यतो हि तत्सूचकानां रूपाणामनित्यत्वं सिद्धमेव। अत एव कथयन्ति यदनित्येषु द्रव्यरूपेष्वभिव्यक्तिरप्यनित्यैव भवितुमर्हति। अत एव सा नियमेन व्यवस्थिता कैश्चिद् विद्वद्भिर्नैव गृह्यते। परं भर्तृहरिमते नास्त्येतत्सत्यम्। घटादयो ह्याश्रया अपि यां जातिमभिव्यंजन्ति, सा नित्यैव। आविर्भावतिरोभावौ तु द्रव्याकृतेः न च द्रव्यात्मनः। आत्मत्वेन स्थिता जातिः स्वरूपमावहमाना पुनराविर्भूतायां द्रव्यव्यक्तौ स्वात्मानं विवृणोति। अतः शब्दस्य नित्यत्वस्वीकारे तदभिव्यज्यमानाया जातेरपि नित्यतास्वीकारः स्वयंभूत एव सिद्ध्यति।"

Manifestation itself does not prove that the process is non-eternal, or that it is the result of a non-eternal thing. Because manifestation is not necessarily confined to the transitory or non-eternal things only. The manifestation of the 'eternal' Jati or community is also a certainty, though with the help of their substrata, no doubt.

"ध्वनियों के अनित्य होने के कारण अभिव्यक्ति को अनित्य मानना या अव्यवस्थित स्वीकार करना उचित नहीं है। यह कहना भी ठीक नहीं है कि द्रव्य की आकृति मिटने या बनने के कारण आकृति भी नित्य नहीं है। वस्तुतः जब हम शब्द को नित्य मानते हैं, तब उसके ध्वन्यात्मक आकार के कारण ऐसा नहीं कहते, बल्कि उसके द्वारा वहन किए जाने वाले स्वरूप के कारण ऐसा कहते हैं। शब्द द्वारा वहन किया जाने वाला यह 'स्वरूप' ही वह 'जाति' है, जो ध्वनिरूप में पुनःपुनः आने पर उस शब्द से एक ही प्रतीति को देती है। 'घट' आदि का शरीर बार-बार मिटने पर भी 'घटत्व' की भावना नहीं मिट पाती। वही 'घट' शब्द के साथ जुड़ी रहकर उसे नित्यता प्रदान करती है। अतः जाति नित्य है, और उसकी अभिव्यक्ति ही नित्य शब्द के द्वारा होती है।"

देशादिभिश्च सम्बन्धो दृष्टः कायवतामिह।
देशभेदविकल्पेऽपि न भेदो ध्वनिशब्दयोः ॥९६॥

"देशभेदाद् नाभिव्यज्यते शब्दः" —इत्येतन्निराकरोति—देशैकत्वं देशनानात्वं वा कायवतामेव धर्मः। न च ध्वनिशब्दौ मूर्तिमन्तौ। तथा हि मूर्तिमन्तोऽपि तावदादित्यादयः एकदेशस्था अपि समकालमेव नानादेशस्था इवोपलभ्यन्ते। सोयमेकदेशस्थानामपि आदित्यादीनां देशभेदविकल्पो वस्तुभेदं नैव जनयतीति। अमूर्तयोस्तु ध्वनिशब्दयोर्देशदेशिभेदव्यवहारातिक्रमात् सत्यपि देशविकल्पावभासे नैवासौ वस्तुगतो भेदस्तयोर्विद्यते। आकाशस्थौ ध्वनिशब्दावेकाधारौ, कथमपि न विच्छिन्नौ विभक्तौ वाऽवगन्तुं पार्येते।"

It is only with the things, having physical and material existence, that those are associated with particular places, times, etc. Even when the difference of time, place, etc., is established in] between the sounds and the word, there comes no real

difference in the nature of these two.

Note—Hence Bhartṛhari and Patañjali declare the unity of Sound and Word : 'tasmād dhvaniḥ śabdaḥ.'

In the Vṛtti Bhartṛhari explains it, basing himself on a Vārttika with the example of Sun, which, though remaining at the same place, is seen at different places simultaneously. That does not necessitate its physical bifurcation or plurality, as such. In the same way, the same word may be used in so many places, and at so many times and even simultaneously.

"देश, काल, आदि का सम्बन्ध शरीरधारी वस्तुओं से ही देखा जाता है। अशरीरी द्रव्य इनके बन्धन में नहीं रहते। दूसरी ओर, इनके बन्धन में रहकर भी आदित्य, चन्द्र, आदि एकदेशस्थ होते हुए भी सर्वत्र दृष्ट और अनुभूत होते हैं। इससे यह भी पता चला कि देशादिभेदमात्र से ही 'वस्तु' का भेद भी नहीं हो जाता। 'जो देवदत्त यहां है, वही मथुरा और स्रुघ्न में भी है'— महाभाष्य की यह उक्ति इससे भी आगे बढ़कर सशरीरियों के भी एकत्व को सूचित करती है। फिर शब्द और ध्वनि को तो अमूर्त माना जाता है। वे ऐसे न भी हों, तो भी 'आदित्यवत्स्युः' आदि वार्त्तिकोक्त महाभाष्यरीति से वे देशादि के कारण वस्तुगत भिन्नता को प्राप्त नहीं होते।"

टिप्पणी :—इस पर भर्तृहरि ने अपनी भाष्यटीका में 'आदित्यवत्स्युः' आदि वार्त्तिकों पर विचारप्रसंग में अधिक प्रकाश डाला है। वैसे 'ध्वनिशब्दयोरन्यत्वे प्रयोजनाभावात्' कहकर भी वे वहीं अन्यत्र उनकी एकता घोषित करते ही हैं।

ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा।
व्यंग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ॥९७॥

स्फोटनादयोः सम्बन्धं द्योतयति—"यथा ग्रहणेन्द्रियस्य चक्षुरादेर्ग्राह्यविषयस्य च रूपादेः परस्परं सम्बन्धो नित्यो योग्यतारूपश्च वर्तते, तथैव व्यंग्यस्य स्फोटस्य व्यंजकस्य नादस्य च सम्बन्धो नित्यो योग्यतारूपश्च।"

अत्रेदमवधेयं यत्पूर्वभणितानुसारेण भर्तृहरिः प्रकाशेन द्वारा चक्षुषि तद्विषये च समानत्वेन शक्त्याधानं स्वीकरोति। शक्तिश्च तयोरेवान्तर्भूतोत्तेजकरूपेण प्रकाशेन प्रेर्यत एव। तथैव स्फोटे नादे

च परस्परयोगित्वमभिव्यञ्जकत्वं च शक्तिरूपेण तु वर्तत एव । इदं च सम्बन्धजातं व्यंग्यव्यञ्जकरूपेण व्यवस्थितम् । वाग्व्यापारेण प्रकाशभूतेनेदमेव सम्बन्धजातं स्फोटनादरूपेणाविर्भूतत्वमानीयते । स्फोटे नादे च या शक्तिः स्वाभाविकी सैव स्पष्टतामानीयते ।

Just as there is eternal and definite relationship, based on fitness, in between the senses and their objects, *e.g.* in the case of Eyes and Forms respectively, in the same way, there is the eternal type of relationship, in between the received sounds and the Sphoṭa, as that of 'manifestor' and 'manifested'.

Note : We have already explained Bhartṛhari's view that the light affects the eyes as well as the object of perception, by energising their inherent qualities. In the same way, Dhvanis act only by promoting the inherent mutual capability of both, ***i.e.***, of Sphoṭa and Nāda.

"जिस प्रकार ग्रहणेन्द्रिय चक्षुरादि की तथा ग्राह्यवस्तु प्रकाश्यविषयादि की स्वाभाविक प्रवृत्ति परस्पर सम्बद्ध होने की है, बाह्यप्रकाशादि तो उनमें अन्तर्हित उस पूर्वोपस्थित शक्ति को प्रबुद्ध मात्र करता है; उसी प्रकार स्फोट और नाद में परस्पर व्यंग्य और व्यञ्जक के रूप में एक दूसरे के साथ सम्बन्ध की स्वाभाविक योग्यता है, जो नित्य है। उच्चारणादि प्रक्रिया तो इस विद्यमान सम्बन्ध को ही प्रकाश में लाती है।"

सदृशग्रहणानां च गन्धादीनां प्रकाशकम् ।
निमित्तं नियतं लोके प्रतिद्रव्यमवस्थितम् ॥ ९८ ॥

तुल्येन्द्रियग्राह्येष्वप्ययमेव नियम इत्युपस्थाप्यते :—

"लोके सदृशग्रहणानां स्वाश्रयसंयोगिद्रव्यान्तरगतस्वसदृशगन्धादिगुणग्राह्याणां गन्धादीनां प्रकाशकमभिव्यञ्जकं प्रतिद्रव्यं प्रत्येकं संयोगिद्रव्येऽवस्थितं निमित्तं नियतं दृष्टमिति ।"

न केवलं श्रवणग्राह्ये नादविषये शब्द एवायमभिव्यञ्जकापेक्षानियमः, किन्तु घ्राणादिग्राह्ये गन्धादिष्वपि अभिव्यंग्यत्वेन स्थितेषु नियमस्त्वयमेव ।

Even when the things are perceived by the senses having

the same attributes as those of themselves, this relationship of manifestor and manifested can be seen as 'fixed'. It is seen in the world that there is a particular causal factor in each case, which is responsible for its manifestation.

"ऊपर भिन्नात्मा इन्द्रियों द्वारा ग्राह्य घट आदि की इन्द्रिय के साथ ग्रहण-ग्राह्य-योग्यता की बात कही गई है। किन्तु एक या समान ही इन्द्रिय द्वारा ग्राह्य गन्धादि भी उसी रूप में अभिव्यङ्ग्य हैं। गन्धादि भाव हैं, जो भिन्न-भिन्न द्रव्यों में रह सकते हैं। फिर भी गन्धरसादि की अभिव्यक्ति सर्वत्र अपने-अपने विषय में स्थिर इन्द्रिय के माध्यम से ही होती है। अतः उनका सम्बन्ध भी अपनी ग्रहण-इन्द्रियों के साथ नित्य है। हां, यह अवश्य द्रष्टव्य है कि जहां इन्द्रिय और उसके विषय में परस्पर ग्रहण और ग्राह्य का सम्बन्ध है, वहां स्फोट और नाद में वह सम्बन्ध इसलिए नहीं हो सकता, क्योंकि उन दोनों में इन्द्रिय और उसके विषय जैसा सम्बन्ध नहीं है। स्फोट और नाद दोनों की उपलब्धि, दोनों के परस्पर व्यंग्य-व्यञ्जक रूप से जुड़े रहने पर भी, श्रवणेन्द्रिय और बुद्धि आदि में होती है, और शब्द उन्हें वहन करने का माध्यम बनता है। इसलिए यहाँ सम्बन्ध, ग्रहण और ग्राह्य का न हो कर, व्यंग्य और व्यंजक का होता है।"

प्रकाशकानां भेदांश्च प्रकाश्योऽर्थोऽनुवर्तते ।
तैलोदकादिभेदे तत्प्रत्यक्षं प्रतिबिम्बके ॥ ९९ ॥

विरुद्धधर्मौ व्यञ्जकव्यङ्ग्यौ कथं परस्परमनुवर्तेते, इत्येतत्स्पष्टीकरोति :—

"प्रकाश्योऽभिव्यङ्ग्योऽर्थः प्रकाशकानामभिव्यञ्जकानां भेदान् धर्मभेदान् अनुवर्ततेऽनुसरति वा। तत्प्रकाश्यार्थस्य प्रकाशकधर्मानुवर्तित्वं तैलोदकादिभेदे, तैलोदकाद्यभिव्यञ्जकानां भेदे, सति तदभिव्यंग्ये मुखादिप्रतिबिम्बके प्रत्यक्षं दृष्टम्।"

The revealed thing or meaning automatically follows the variations in the revealor thing or sound etc. This is evident in the case of reflections varying according to the variations in the reflector oil or water etc. But, still, as the original object does

not vary, despite all the variations in its reflections, in the same way, the real form of the word remains the same or unchanged. despite all the variations in the sound and its reception.

"यह एक सर्वमान्य सत्य है कि प्रकाशक या अभिव्यक्त करने वाली वस्तु के धर्म के अनुसार प्रकाश्य या अभिव्यज्यमान अर्थ का धर्म भी बदल जाता है। यह बात तैल या पानी में पड़ने वाले प्रतिबिम्बों से पूरी तरह स्पष्ट हो जाती है। उथले पानी, गहरे पानी, तरंगित पानी, आदि के भेद से एक ही आकार भिन्न-भिन्न रूप में प्रतिबिम्बित दिखाई देता है। तरंगादि भेद से उसमें संख्याभेद भी संभव है। रंग की दृष्टि से भी तेल, पानी आदि के कारण भिन्नता आती है। इसी प्रकार स्फोट के अभिन्न होने का अर्थ यह नहीं है कि उससे सर्वत्र एक सी ही प्रतीति हो। बल्कि ध्वनिभेद से भिन्न व्यक्त होने वाले शब्दों के द्वारा होने वाली अनुभूति भी भिन्न होती है और उसका स्फोटात्मक ग्रहण भी भिन्न-भिन्न होता है।"

विरुद्धपरिमाणेषु वज्रादर्शतलादिषु।
पर्वतादिसरूपाणां भावानां नास्ति संभवः ॥ १०० ॥

अधुना दर्शयति यत्कथं स्वल्पपरिमाणेऽपि ग्रहणे विशालपरिमाणोऽपि ग्राह्यो गृह्यते, विरुद्धं वा ततो दृश्यते :—

"वज्रे दर्पणतले वा निम्नोच्चतयाऽन्यथा वा विशालमपि वस्तु स्वल्पपरिमाणतया, स्वल्पं वा वस्तु विशालपरिमाणतया दृश्यत एव। तत्र च विशालतायां ह्रस्वत्वे वा दर्पणादिकस्य विशालता ह्रस्वता वा नैव हेतुभूताऽत्रतिष्ठते। अन्यथा विरुद्धपरिमाणानामन्तःसंनिवेशिनां पर्वतादिसरूपाणां भावानामुत्पत्तिः वज्रदर्पणादिष्वाधारेषु संभवत्येव न। तेषां ग्रहणं च तत्र तत्र स्वरूपतया भवत्येव। स्वरूपे चाकारादिविचारो नैवोचितः।"

It is not possible that the objects like mountains etc., having different dimensions, should enter and be produced inside the reflectors, like mirror or diamond etc., which are of different or contrasting dimensions.

(But we see that things like mountains etc., are reflected in or through the mirror or diamond etc. Thus a reflectional

reception is possible, even without the original object being involved physically or otherwise).

"वज्र (हीरा) छोटा है, किन्तु उसमें प्रतिबिम्बित होकर या उसके माध्यम से उससे सहस्रगुण बड़ी वस्तु भी देखी जा सकती है। दर्पण छोटा होकर भी बड़ी वस्तु को यथावत् रूप में, निम्न-उच्चादि तलभेद से छोटे-बड़े रूप में दिखा देता है। इस प्रकार ग्रहणोपायभूत माध्यम के छोटा-बड़ा होने से वस्तु के स्वरूपग्रहण में अन्तर नहीं पड़ता। यद्यपि वह स्वरूप जिस प्रतिबिम्ब के रूप में दिखाई देता है, वह छोटा-बड़ा अवश्य हो सकता है। द्रव्य का यह स्वरूप शब्द के स्फोट की भांति है, जो ध्वनि के विस्तारादि के अनुसार बड़ा-छोटा न होकर अभिन्नकाल ही प्रतीत होता है। भले ही हम शब्द के उच्चारणकाल को प्राकृतध्वनि का काल होने के कारण 'शब्द का काल' मानते रहें। वह किसी भी भांति 'स्फोट का काल' नहीं है।"

तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु ।
वृत्तिकालः स्वकालश्च नादभेदाद् विभज्यते ॥ १०१ ॥

कालविषयमेवोपसंहरति :—"अभिन्नकाला नित्याश्च वर्णवाक्यपदादयः। नित्यानां हि स्थितौ सहकारिण्याः कालशक्तेर्व्यापारो नैव विद्यते। लोकव्यवहारे तु बुद्ध्या पूर्वान्तापरान्तयोरनुगम्यमानात्मतत्वाः स्थितिं प्रति न भिद्यन्ते। सर्व एव प्रचितापचितरूपा वर्णपदवाक्याख्याः स्फोटाः। उपलब्धिविषयत्वमागतेषु तेषु स्वयमभिन्नकालेष्वपि स्वोपलब्धिकालाऽभिमानो जायते। अत एव स्वकालो वृत्तिकालश्च तस्मिन् प्रसंगे वर्ण्यते शब्दस्य। प्राकृतध्वन्युत्थितः कालः शब्दस्य स्वकालो विद्यते। स च शब्दस्योपलब्धेः प्रागेवोच्चारणकालमात्रे विद्यते। वृत्तिकालश्च धर्मो वैकृतध्वनेः। तस्य च प्रादुर्भावः शब्दस्योपलब्धेरुत्तारमेव बाह्यद्रुतादिभेदेन जायते। अतः कथ्यते यत्तावुभावपि नादभेदादेव परस्परं विभज्येते।

एतदपि स्पष्टमेव यत्तावुभावपि धर्मौ प्राकृतवैकृतध्वनिभेदयोरेव, न पुनः शब्दस्य।"

All the sphoṭas, of Phoneme, Word and Sentence, do not differ in their cognition, as far as time-factor is concerned. It is the difference of the time-factor, involved in the production of

the partaking sounds, that is taken as word's *own time*. And it is the difference of the time-factor of the separate cognition of the sounds, involved in each case of phoneme, word, and sentence, which is supposed to be as the '*time of its recognition*.'

"वर्णपदवाक्य की स्फोटरूपा उपलब्धि और उनकी स्वरूप में स्थिति अभिन्न-काल ही होती है। अतः इन दोनों प्रसंगों में उनसे सम्बद्ध कालविचार का अवसर ही नहीं उठता। पर फिर भी शब्द के सम्बन्ध में उसके स्वकाल और वृत्ति-काल की चर्चा की जाती है। वास्तव में ऐसा नाद के दो भेदों—प्राकृतध्वनि और वैकृतध्वनि—के साथ 'ग्रहण' का उभयात्मक सम्बन्ध होने के कारण कहा जाता है। प्राकृतध्वनिकाल को 'स्वकाल' कहा जाता है, जो कि शब्दोच्चारण में, उसके ग्रहण से पूर्व, प्रयुक्त कालमात्रा से सम्बद्ध होता है। वैकृतध्वनि के काल को 'वृत्तिकाल' कहा गया है, जिसका प्रसंग शब्द के स्फोटात्मक ग्रहण के बाद आरम्भ होता है।"

यः संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः ॥ १०२ ॥

शब्दस्य नित्यपक्षमाश्रित्य स्फोटध्वन्योरन्तरं तस्मिन्विषये मतान्तरं च प्रदर्शयतिः—

"संयोगविभागाभ्यां जातेन ध्वनिना व्यंग्यः शब्दो यदोच्चारणे-न्द्रियैः श्रवणेन्द्रियैश्च स्वरूपेण गृह्यते, तदा साऽस्यावस्था स्फोटनाम्ना कथ्यते। स्फोटस्तु शब्दस्वरूपमेव। स च ध्वनिभिः साधनभूतैरुपा-दीयते। अथ तत्प्राप्त्यनन्तरं तदनुग्राहिणो यथोत्तरं प्रचीयमानोपचीय-मानाऽभिव्यक्तिसामर्थ्या द्रुतादिवृत्तिभेदव्यवस्थाहेतवो प्रचयापच-यात्मका वैकृतध्वनयो जायन्ते। केचन पुनः शब्दजान् तानेव ध्वनीन् शब्दस्वरूपेण स्वीकुर्वन्ति।"

Some of the scholars believe that whatever is produced by the organs of sound-production, through their contacts and separations, becomes Sphoṭa. It is received through its sounds and form. For them, Dhvanis are those, which are produced by the formal appearance of the word itself. Thus, the sphoṭa is related with the primary sounds, while variation in the intent is the product of dhvanis, which originate only after the manifestation of sphoṭa.

"सामान्यतः स्फोट को शब्द का वास्तविक स्वरूप माना गया है, क्योंकि संयोगविभागात्मक ध्वनियों के द्वारा उत्पन्न और नाद द्वारा गृहीत होने पर शब्द उसी रूप में अपनी प्रथम प्रतीति देता है। किन्तु कुछ विद्वान् स्फोटरूप में गृहीत शब्द से उत्पन्न होने वाली प्रचयापचयात्मक वैकृत ध्वनियों से उपलब्ध होने वाली प्रचयापचयात्मक प्रतीति को ही 'शब्द' स्वीकार करते हैं, या शब्द का वास्तविक स्वरूप मानते हैं।"

टिप्पणी—यहां स्फोट की अखण्ड उपलब्धि और तदनन्तर विवेचनात्मक विस्तारमयी उपलब्धि के विषय में दो मतों को स्पष्ट किया गया है।

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते।
परस्तु शब्दसन्तानः प्रचयापचयात्मकः ॥ १०३ ॥

स्फोटस्याऽभिन्नकालं स्वरूपं विश्लिष्य वैकृतध्वनिजन्यं ग्रहणं समाहरति :—

"पूर्वमेव स्पष्टीकृतं यद् ध्वनेः स्वभावोऽयं यो ह्रस्वदीर्घादिरूपेण स्थितो ज्ञातश्च। अतो ध्वनीनां संख्यया परिणामेन वोपजायमानं दीर्घत्वं ह्रस्वत्वं वा शब्दाकृतेरेव, न च पुनः स्वरूपेण शब्दस्य। शब्दस्य बुद्धौ ग्रहणं धारणं वा स्फोटरूपेण बीजरूपेणैव वा वर्त्तते। तदेव श्रोतृकृते अपि स्फोटरूपेणैवोपजायते, गृह्यते च तेन तथैव। स्फोटश्च पुनरभिन्नकालः। अत एव शब्दस्थानां ध्वनीनां ह्रस्वदीर्घादिभेदेन नैव तस्मिन् कश्चिद् भेद उपजायते। स्फोटस्य सर्वेषामेव शब्दानां कृते समानकालपरिमाणत्वात्, सक्षणप्रतीत्या हेतोः। परमनन्तरोपजायमानानां वैकृतध्वनीनां प्रभावोऽयं यत् स एव शब्दः स्फोटोत्तरमर्थाभिव्यक्तिरूपं प्रचयापचयात्मकं विस्तारं लभते। वृत्तिजन्योऽयं प्रभावः शब्दस्य सन्तानो विस्तारो वाऽयमित्येवं कथ्यते। तस्य च नैव कालकृतं बन्धनम्।"

Smallness and the bigness are attributed to the word, due to the length and number of the sounds, partaking in its composition. As both the sounds, *i.e.*, primary and secondary ones, are produced and perished without distinction, there remains

no question of any difference in between a big and a small word. Their cognition in the form of sphoṭa is simultaneous and instantaneous. But the reverberating sounds produced therefrom make all the difference. Due to these reverberating sounds only the duration of the varying repercussions of the same word varies in degrees, in different situations. Sometimes it is indifferent from that of the sphoṭa, while sometimes it seems to become infinite.

"पहले कहा गया है कि ह्रस्वत्व, दीर्घत्व आदि का भेद ध्वनियों में होता है। ध्वनियों की अधिकता या कमी के कारण भी हम शब्द के आकारमात्र को छोटा या बड़ा कह सकते हैं। पर उसके 'स्वरूप' पर इस सबका प्रभाव नहीं पड़ता। स्फोट के रूप में शब्द का जो स्वरूप ग्रहण होता है, वह अभिन्नकाल और सक्षण प्रतीति वाला होने के कारण ह्रस्वदीर्घादि भेद से भिन्न नहीं होता। स्फोटरूप में ग्रहण के बाद वृत्तिभेद के कारण उसमें जो विस्तार या ह्रास की प्रतीति सी होती है, वह वैकृत ध्वनियों के कारण होती है। और वह भिन्न भी हो सकती है। शब्द का यह वृत्तिगत अर्थविस्तार उसे ही 'अनन्त विस्तार वाला' कर देता है। पर यह विस्तार स्फोट के बाद ही होता है।"

टिप्पणी—यहां शब्द के 'ब्रह्मत्व' या बृंहणत्व का वास्तविक रूप सामने आता है। स्फोट के द्वारा उसका ग्रहण होता है। किन्तु उसका अर्थविस्तार या सम्भावनाविस्तार वैकृत ध्वनि के द्वारा ही स्फोटोत्तरकाल में होता है।

दूरात्प्रभेव दीपस्य ध्वनिमात्रं तु लक्ष्यते।
घण्टादीनां च शब्देषु व्यक्तो भेदः स दृश्यते ॥ १०४ ॥

दीपस्य घण्टायाश्चोदाहरणेन स्फोटनादयोर्ध्वनेश्च भेद विविनक्ति :—

"यथा दूरस्थे प्रज्वलिते दीपे प्रदीपपदार्थोऽस्य प्रभा च सहैव जायेते, दूराच्च प्रदीपस्य प्रभामात्रमेव लक्ष्यते दूरव्यापित्वात्; तथैव यद्यपि स्फोटनादौ सहजौ व्यंग्यव्यञ्जकरूपेण स्थितौ च वर्तेते, तयोर्विस्तरस्तु वैकृतेन ध्वनिना दूरादप्यनुभूयते। अथवा दूरात्केवलं ध्वनिमात्रमेव लक्ष्यते। घण्टाया उदाहरणेनेदं स्पष्टं भवति। यथा

प्रथमाऽभिघातकाले नादस्फोटौ सहजावेव, तदनन्तरं च नाद-मात्रं ध्वनिमात्रं वैव केवलं लक्ष्यते, तथैव शब्देऽप्युच्चरिते प्रथमं नाद-स्फोटयोरेव सहजन्म भवति । तदनन्तरं च ध्वनिविस्तारेणैव तस्या-नुभूतिश्चिरकालं यावदनुभूयते ।"

Just as in the case of a lamp, when we see it from very near, we receive the *light* and *lighted lamp* at the same moment. But if we see it from afar, we receive only its spreading light, and not the lamp itself. And just as the people standing nearby receive the bell sound and its sphoṭa simultaneously, while the people standing afar receive only its reverberating sounds. Similarly there is a distinct difference in between the primary and secondary sounds. Primary sounds exist only before the sphoṭa. But after that there remain only the secondary sounds, as though expansions of the previous ones.

"जिस प्रकार दूरस्थ प्रज्वलित दीप में 'दीप' और 'तेजस्' की प्रतीति साथ साथ ही होती है, किन्तु बाद में दूरवर्ती लोगों को उसका केवल प्रभाविस्तार ही दिखाई देता है, उसी प्रकार उच्चारण होते ही यद्यपि नाद और स्फोट की अनुभूति साथ-साथ और अविहित रूप में होती है, तथापि स्फोट और नाद की प्रत्यक्ष अनुभूति के मिट जाने पर भी वैकृत ध्वनि के विस्तारों के रूप में उनकी अनुभूति बहुत देर तक होती रहती है। या, दूर से शब्द का सम्बन्ध या उसका प्रत्यय केवल ध्वनि के माध्यम से, या उसके रूप में, ही होता है ।

"यह बात घण्टे के उदाहरण से भी भलीभांति समझी जा सकती है । घण्टे पर प्रबल प्रथम अभिघात के साथ ही 'स्फोट' और 'नाद' रूप शब्द की प्रथम प्रतीति हो जाती है। किन्तु दूरतर स्थित लोगों को उसका ज्ञान बाद में विस्तृत होने वाले 'नाद' से होता रहता है । या, विस्तारी परवर्ती ध्वनियों के रूप में उस शब्द की अनुभूति बहुत देर तक होती ही रहती है ।"

द्रव्याभिघातात्प्रचितौ भिन्नौ दीर्घप्लुतावपि ।
कम्पे तूपरते जाता नादा वृत्तेर्विशेषकाः ।। १०५ ।।

दीर्घप्लुतादिध्वनिभेदाद् वैकृतध्वनिभवानां नादानामन्तरं कथयति :—

"द्रव्ये द्रव्याभिघाताद् ध्वनिर्जायते। यथा ताल्वादिस्थानेषु जिह्वादिकरणाभिधाताद् वर्णात्मको ध्वनिः। तस्यैव कालमात्राभेदेन दीर्घादिभेदो जायते। अभिघातानन्तरं कम्पोऽप्युपरत एव प्रतीयते। तस्मिन्नुपरते वैकृतध्वन्याख्यास्तदुद्भवा वा नादा जायन्ते। तेषामेवेदं परिणामं यद् बाह्यद्रुतादिरूपाऽभिव्यक्तिः कालविस्तारं वा प्रचयापचयात्मकं विस्तारं वा प्राप्नोति।"

It is because of the greater intensity of the contact in between the places and the organs of articulations that there is a difference in between the length of the Long and Protracted sounds as well. It is caused by the vibrations, produced in between the successive sounds. When these vibrations cease, the Nāda or the 'received sounds' become the manifestors of variations in the 'intent or vrtti' of a word. Their length is not related with that of the long or short sounds !

"द्रव्य पर द्रव्य की चोट पड़ने से ध्वनि उत्पन्न होती है। तालु आदि स्थानों पर जिह्वादि इन्द्रियों के अभिघात से भी यही बात होती है। दीर्घ-प्लुतादि भेद तो ध्वनियों में ही, प्राकृत ध्वनियों में ही, होता है। इससे अधिक उसका महत्त्व नहीं है। अर्थात्, स्फोट या उसकी उपलब्धि के बाद होने वाले नादों में यह भेद नहीं पाया जाता। प्राकृत ध्वनि का कम्प समाप्त होने पर भी जो नाद या अनुनाद-सा चलता है, वैकृत ध्वनि का ही रूप होने के कारण, वह बाह्यद्रुतादि वृत्तियों का विशेषक या अभिव्यंजक बन जाता है।"

अनवस्थितकम्पेऽपि करणे ध्वनयोऽपरे।
स्फोटादेवोपजायन्ते ज्वाला ज्वालान्तरादिव ॥ १०६ ॥

ध्वनिप्रकरणमेवोपसंहरन् प्राह :—"यद्यप्युच्चारणात्मको व्यापारः प्रवर्त्तन्नेवास्ते, करणेषु च कम्पोऽपि वर्त्तत एव, तथापि पूर्वगृहीतादखण्डात्मनः स्फोटादन्ये वैकृतो ध्वनयो जायन्ते। स्फोटोपलब्धिरखण्डा। तदनन्तरं च अंशाभिव्यंजको यो व्यापारः स स्फोटादेवोत्पन्नो वैकृतध्वनेः परिणामतया गृह्यते। अतः शक्यते कथयितुं यदनुपरतध्वनिव्यापारादेव उच्चारणात्मिकायाः प्राकृतध्वनेः इमे

वैकृता ध्वनयस्तथैव जायन्ते, यथा प्रज्वलितात्प्रदीपाज्ज्वालामादा-यान्या: प्रदीपज्वाला ज्वाल्यन्ते। यथैका प्रज्वलिता हि ज्वालाऽन्यासां ज्वालानां कारणं भवति, तथैव प्राकृतध्वनयोऽपि स्फोटमुत्पाद्य स्वयमध्वस्ता ध्वस्यमाना वा वैकृतध्वन्यात्मकं व्यापारं जनयन्ति।"

Though the sound-producing organs may still be vibrating, even after the production of the primary sounds, and sphoṭa might have been accomplished, the secondary or reverberating sounds start originating from the latter ; as one flame is lighted from the other one.

Thus, it appears as if the primary sounds are the direct causes of the secondary sounds.

"स्फोट की युगपत् प्रतीति के साथ ही यदि अभी इन्द्रियों में उच्चारण-व्यापारजन्य कम्पन विद्यमान ही हो, और वह समाप्त न हुआ हो, तब भी वैकृत ध्वनियों का विस्तार वहीं से आरम्भ हो जाता है। मानो प्राकृत ध्वनियों से ही वैकृत ध्वनियों ने जन्म लिया हो। यह प्रक्रिया ऐसी प्रतीत होती है, जैसे एक प्रज्वलित ज्वाला से दूसरी ज्वाला प्रदीप्त हुई हो, और दीपमाला-सी बन गई हो।"

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।
कैश्चिद् दर्शनभेदो हि प्रवादेष्वनवस्थित:॥ १०७॥

अधुना त्रिविधान् वादान् शब्दत्वकल्पनाविषये परिगणयति—

"वायुमणून् ज्ञानं वाऽधिकृत्य सन्ति त्रयो वादा शब्दत्वविषये। केषांचिन्मते तु वायोरेव शब्दत्वमापद्यते। अन्येषां मतेऽणव एव सर्वशक्तित्वाच्छब्दभाजनतां लभन्ते। अन्ये पुन: ज्ञानमेव शब्दत्वेन विपरिणमितं मन्यन्ते। परमेतेषां वैविध्यमेतावदेव यदेते खण्डसत्यतया स्वीकृता: सन्ति। त्रितयमपि वायोरणूनां ज्ञानस्य च समवेतरूपेण शब्दत्वमुपयाति। परं भिन्नं दर्शनमाश्रित्य विविधा हि प्रवादा: प्रचलिता: भवन्ति।"

There are three different theories about accomplishment of the word-form. According to these Air, Atoms, and Know-

ledge are the respective basic factors, which transform themselves into 'words'. But to others, these different theories are born merely due to the different angles of thinking. Otherwise, each one of them is only partially true.

"वायु, अणु और ज्ञान को लेकर शब्दत्व के विषय में तीन वाद चल पड़े हैं। एक के अनुसार वायु ही शब्दत्व को प्राप्त होता है। दूसरे के मत में अणु ही शब्दत्व को प्राप्त होते हैं। तीसरा ज्ञान का विपरिणाम शब्दत्व के रूप में देखता है। यह मतभेद उनके चिन्तन के आधार की भिन्नता या दृष्टिकोण की भिन्नता के कारण है। वास्तव में सत्य यह है कि उक्त तीनों ही तत्त्वों का अपना-अपना महत्त्व इस विषय में है।"

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्त्तिना।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥ १०८ ॥
तस्य कारणसामर्थ्याद् वेगप्रचयधर्मणः।
सन्निपाताद् विभज्यन्ते सारवत्योऽपि मूर्तयः ॥ १०९ ॥

वायोः परिणामोऽयं यः शब्दः, इत्येतन्मतमुपस्थापयति—

"आत्माऽभिव्यक्तये यदा वक्तुरिच्छा प्रभवति, तदैव तत्प्रति प्रयत्नमपि समुद्भवति। एवं वक्तुरिच्छानुवर्त्तिना प्रयत्नेन सर्वप्रथमं वायुरेव गतिमान् क्रियते, तस्य सर्वक्रियामूलत्वात्। लब्धगतिश्च प्रेरितो वायुः तत्तत्प्रयत्नानुसारमितश्चेतश्चाभिघातक्रियां करोति। अथवा अवरुद्धो मुक्तो वा सः अभिघातक्रियोत्पादको जायते। अभिघातेन जाता ध्वनय एव शब्दत्वमापद्यन्ते, कथ्यन्ते वा तथा।

"कारणसामर्थ्यात् प्रयत्नादिहेतोः वेगप्रचयधर्मणस्तस्य वेगमापन्नस्य वायोः सन्निपातात् तस्मिन् तस्मिन् स्थाने निश्चितप्रयोजनेनाऽभिघातात् सारवत्योऽपि मूर्तयो विभज्यन्ते। यथा अयोघनसन्निपातेन कठिनतमाः पाषाणमूर्तयोऽपि भिद्यन्ते, तथैव वायोरभिघातहेतोरेव भावरूपिण्यः सारवत्तमा अपि विचारमूर्तयः तालुकण्ठादिस्थानानुसारं प्रयत्नं प्रविभज्य, तेषामभिघातं वा कृत्वा, प्रविभज्यन्ते मूर्ततामानीयन्ते।"

The air set in motion by the effort, corresponding to the desire of the speaker, strikes at the different places of articulation and is, thus, transformed into sounds.

With the impact of the forceful air, caused by the desire and effort of the speaker, even the most solid forms of the sentiments or ideas are broken up and given a shape thereby. It is done by the Air by striking at different places, following the desire of the speaker.

"सर्वप्रथम वक्ता आत्माभिव्यक्ति की इच्छा से प्रेरित होता है। उस इच्छा के प्रबल होने पर उसमें प्रयत्न की भावना उत्पन्न होती है। आत्माभिव्यक्ति के उस प्रयत्न से सर्वक्रियाओं का प्रणेता और प्रेरक वायु गतिमान् या क्रियावान् होता है। गतिमान् यह वायु तालु आदि भिन्न-भिन्न मुखस्थानों पर प्रयत्नानुसार अभिघात करता है। और तब ध्वनि का जन्म होता है। और ('तस्माद् ध्वनिः शब्दः' के अनुसार) इस ध्वनि-प्रचय को ही 'शब्द' कह दिया जाता है।

"प्रयत्न के बल से, वेग के आधिक्ययुक्त स्वभाव वाले इस वायु के पुनः-पुनः अभिघात से सारवती मूर्तियां भी खण्ड-खण्ड होकर सामने आती हैं। यथा लौहघन के पुनः-पुनः अभिघात से कठिन से कठिन पाषाण खण्ड भी टूटकर मूर्ति आदि रूप धारण कर लेता है, उसी प्रकार भाव या विचार का कठिन से कठिन या पूर्णतया विश्लिष्ट रूप भी टूट-टूटकर ध्वनिजन्य शब्द के रूप में सामने आता है।"

टिप्पणी—'वायु' के इस प्रसंग में हमें दो बातें स्मरण रखनी हैं :—

(१) अग्निपुराण का यह श्लोक—

"यदान्तरिक्षे बलवान् मारुतो मारुता हतः।
जायते तत्र निर्घोषो बलवान् वायुसंभवः॥"

(२) महाभाष्य में कथित—'तस्माद् ध्वनिः शब्दः'। क्योंकि वायु के बल से ध्वनि ही पैदा होती है। उसे ही शब्द मानने पर वायु से शब्द की प्राप्ति कही जा सकती है। परन्तु, भर्तृहरि इसकी व्याख्या इस प्रकार करते हैं। "ननु च ध्वनिः शब्दगुणः। एवं ह्युक्तम्--स्फोटः शब्दः, ध्वनिस्तस्य व्यायामादुपजायते इति। उच्यते द्रव्यादयो न भवन्ति शब्दाः। एवंपरायां चोदनायां ध्वनिशब्दयोरन्यत्वे प्रयोजनाभावात्, एकत्वेन व्यपदेशः" (त्रिपदी, १-१-१)।

अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः।
छायातपतमःशब्दभावेन परिणामिनः॥ ११०॥

स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ॥ १११ ॥

अणव एव शब्दत्वमापद्यन्ते, मतमेतत् प्रस्तौति :—

"वैशेषिकमतेन पृथिव्यप्तेजोवायूनां परमाणवश्चतुर्विधाः । सांख्य-मतेन च तन्मात्रारूपेण पंचविधाः परमाणवो मन्यन्ते, रूपतन्मात्रा, स्पर्शतन्मात्रा शब्दतन्मात्रादिभेदात् । तेषामणुरूपाणां तत्त्वानां संहत्यैवाऽयं चमत्कारो जायते, यद् विविधरूपेण पदार्थानामाविष्कृतिर्जायते । छाया, आतप, तमः—आदीनि रूपतन्मात्राख्यस्य परमाणोः परिणाम-भूतानि । शब्दतन्मात्रायाश्च परिणामो, वायवीयानामणूनां वा परि-णामो, हि शब्दत्वेन प्रवर्त्तन् दृश्यते । अणूनां भेदसंसर्गात्मिकेयं वृत्तिः कथं प्रभवति भिन्नानां द्रव्याणामुत्पादने विनाशे च, इत्याधुनिका वैज्ञानिका अपि ज्ञातुं प्रयत्नशीला एव । अविनश्वरतां नित्यतां वाऽधि-कृत्य कृतो वादोऽपि परमाणुवादमेवेदमाश्रित्य स्थितः ।

"एषु शब्दाख्या वायव्यश्च परमाणवो स्वशक्तिप्रकाशनकाले, प्रबुद्धायां वा शक्तौ जातायां, प्रयत्नेन हेतुना प्रेरिताः संचालिता वा प्रथममभ्राणीव प्रचयमुपयान्ति । मनसि हृदि च समेत्य प्रबलता-मुपगतास्त एव शब्दाख्याः परमाणवः शब्दत्वमुपयान्ति ।"

According to the Second theory, these are the atoms of all the five or four Great Elements (mahābhūtas), which trans-form themselves into different kinds, *e.g.*, into light, shadow or darkness, etc., due to their combination or disintegration. These atoms are all-powerful ones.

The atoms of the word-element, relating to Air or Ether accordingly, are set into motion by the effort and collect like clouds. It all happens, when they begin to manifest their power, provoked by the effort.

"वैशेषिक दर्शन के अनुसार पृथिव्यादि आकाशरहित चार महाभूतों के चार प्रकार के परमाणु ही विश्व की समस्त मूर्त्तियों के सर्जक हैं । सांख्य के अनुसार इन पांचों महाभूतों की पांचों तन्मात्राएं ही परमाणुरूप हैं । सर्वसर्जक होने से ये सर्वशक्तिमान् हैं । इनके संसर्ग और भेद के कारण ही विविधात्मक सर्जन और विघटन की क्रिया होती रहती है । छाया, आतप, तम और शब्द

आदि इन्हीं परमाणुओं के परिणाम हैं।

"जब इनकी शक्ति अपना प्रभाव दिखाने लगती है, तब उससे जिस प्रयत्न का उद्भव होता है, उससे प्रेरित ये शब्द-परमाणु बादलों की तरह एकत्र हो कर अभिव्यक्त होते हैं।"

टिप्पणी :—आधुनिक वैज्ञानिक परमाणु की इसी शक्ति को मानकर आगे बढ़ रहे हैं।

अथाऽयमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥ ११२ ॥

अधुना चतुर्भिः शब्दोत्पत्तिं ज्ञानस्य परिणामरूपेण विवृणोति :—

"एकमेव शब्दतत्त्वं वाङ्मनसाख्यप्रविभागेन विभक्तं विद्यते। मनस एवेयं वृत्तिर्यज्ज्ञानं नाम। तदाश्रयत्वान्मन एव ज्ञाता। स चातीन्द्रिये वागात्मनि ज्ञानस्वरूपे स्थितः। सोऽयमान्तरो हृदाकाशे वर्तमानो ज्ञाता स्वस्य रूपस्य व्यक्तये शब्दरूपमाश्रयति, शब्दरूपेणैव माध्यमभूतेनात्मानमभिव्यनक्ति च।"

Inner knower of everything is Manas, or mind, which resides in the minute and invisible speech-element. It is this Manas, which tries to display explicitly its own real form, and finally takes the shape of the external word-form.

"शब्दतत्त्व एक और अखण्ड है। 'वाङ्मनसौ' के रूप में उसी का विभाजन होता है। यह मन ही ज्ञाता है। हृदय से सम्बद्ध होने से यह आन्तर है। शब्दोद्भूत और वाक्सहचारी होने के कारण यह सूक्ष्म वागात्मा में स्थित रहता है। ज्ञान का उद्भव वाक् से अविच्छिन्न होने के कारण यह सम्बन्ध शाश्वत भी है। अर्थात् मूल रूप में मन ही व्यापार का मूल है। यह ज्ञाता मन ही आत्माभिव्यक्ति के लिए या आत्मरूप के प्रकाशन के लिए, अर्थात् अपने ज्ञानस्वरूप को रूपात्मक अभिव्यक्ति देने के लिए, शब्द का ध्वन्यात्मक रूप ग्रहण करके बाहर आता है।"

स मनोभावमापद्य तेजसा पाकमागतः।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥ ११३ ॥

"स एवान्तरो ज्ञाता मनोरूपः तेजसा शरीरान्तःस्थितया विश्लेषसंश्लेषात्मिकया पाकशक्त्या परिपक्वतां प्राप्तो मनोभावत्वं प्राप्नोति। मनोभावमापन्नः स शब्दस्वरूपे ह्यात्मानं स्थिरीकरोति। शब्दस्वरूपे स्थित एवायं ज्ञाता वायुमाविशति, तं प्रेरयति वा। प्राणवायुमाविष्ट एव स इन्द्रियादिजैः प्रयत्नैः बाह्याभिव्यक्ति प्राप्नोति, ध्वनिरूपेण वाऽऽविर्भवति।"

This inner mind or self becomes a 'concrete idea', after gaining maturity, because of the Tejas or the catalytic agent. Only after taking the shape of a 'concrete idea', it enters the Vāyu (or Air), which is nothing but life-breath or Prāṇa. And only after its entrance and transformation in this latter stage, it is emitted in the form of the sounds.

"वह ज्ञाता मन ही बुद्धि की विवेचनात्मक तेजस् शक्ति के द्वारा संश्लेष-विश्लेष प्रक्रिया से परिपाक को प्राप्त होकर 'मनोभाव' को प्राप्त होता है। मनोभाव ठोस होता है। यह ही शब्द के स्वरूप को प्राप्त करता है। स्वरूपवान् यह शब्द ही प्राणवायु को प्रेरित करता है। उत्तेजित प्राणवायु समस्त उच्चारणयन्त्र और तज्जन्यप्रक्रिया को प्रवाहित करता है। तब कहीं ध्वनिमय शब्द का आविर्भाव 'उदीरण' के रूप में होता है।"

टिप्पणी :—'मनोभाव' यहां शब्द की ठोस कलपना या 'कंक्रीट इमेज' के लिए कहा गया है।

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।
तद्धर्मेण समाविष्टस्तेजसैव विवर्त्तते॥ ११४॥

"उक्तरीत्या सिद्धमिदं यद् वायुर्मनसोऽन्तःकरणरूपस्य आश्रयतां प्राप्नोति। मनो वायुमाश्रित्य तमपि तद्धर्मेणैव युक्तं करोति। तदा वायुस्तेजसा हेतुना गतिशीलः सक्रियो वा भवतीत्यर्थः। तस्य च प्रकाशनात्मकोऽयं व्यापारो पाककारिणा तेजसैव माध्यमेन संभवति। तेज एव तस्य संश्लेषविश्लेषजन्यं परिपाकं कृत्वा तमुच्चारणात्मके व्यापारे समर्थं करोति।"

Thus, in reality, it is this inner-sense (or inner self), which is at the root of all this speech phenomenon. Vāyu or Air becomes the substratum or resting place (*i.e.*, housing place) for it. After getting the qualities of the former, it is activated and works in collusion with the Tejas (or the catalytic agent).

In other words : the 'self' becomes the 'mind', of which 'air' becomes the base. Due to this contact, air becomes impregnated with the attributes of the mind and, thus, becomes the 'word'.

"इस प्रकार वायु अन्तःकरण या अतीन्द्रिय मन का आश्रयस्थल बन जाता है। तब वायु में भी मन की भांति तेजस् के गुण आ जाते हैं। वह गतिशील होता हुआ मन के संश्लेषणात्मक और विश्लेषणात्मक गुणों से युक्तवत् हो जाता है। तेज के ही कारण तब उसकी गतिविधि प्रकाशनात्मक व्यापार में प्रवृत्त होती है।"

विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥ ११५ ॥

"एवं प्राणो हि मनोव्यापारेण तद्धर्मेण वा युक्तः स्वात्मनो मनोभावरूपस्यैव ग्रन्थीन् विभजन् तस्य विविधव्यञ्जकान् पृथक्कृत्य प्रकाशयन् पृथग्विधान् श्रुतिरूपानुत्पादयति । श्रुत्यात्मको ह्ययं ध्वनिः । तदेव वर्णतयोपलभ्यते । अथ वर्णा हीमे प्राणत्वमापन्नस्य मनोभावस्याभिव्यञ्जका जायन्ते। त एव परिणामतया चापि स्थिताः । अतो वर्णेष्वभिव्यक्तेषु आन्तरस्य ज्ञातुरात्माभिव्यक्तेरिच्छा व्यावृत्ता भवति । एवं च प्राणा वर्णानभिव्यज्य वर्णेष्वेवोपलीयन्ते । न स्युर्यद्युपलीनास्तदा तेषां वर्णानां जन्म एव न संभवेत् । का कथा पुनरर्थवत्तायाः । जन्मापि नाम ज्ञातुरिच्छासमावेशादेव प्राणक्रियायाः परिणामभूत एव ।"

Thus, breath or air is not the real cause of this expressional phenomenon, it being a helping agent only. But this agent splits itself into the sounds or phonemes, which finally take the shape of different words. Thus, when phonemes become

manifest, this prāṇa merges itself into the former ones. Only because of this merger the phonemes carry that much weight and meaningfulness. Otherwise, they are meaningless sounds only.

"यह प्राण ही तेजस् के द्वारा अपने आपको ग्रन्थि-विभाजन के रूप में विभक्त करता हुआ श्रुतिरूप विविध वर्णों के रूप में प्रकट करता है। वर्णों के आविर्भाव के साथ ही उसका व्यापार पूरा हो जाता है। तव वर्ण ही प्राणों की उस तेजस् शक्ति को वहन करते हैं। मानो प्राण वर्णों में ही लीन होकर रह गए हों। अन्यथा, वर्णों के उच्चारण का प्रयोजन ही नहीं रह जाएगा।"

टिप्पणी :—निम्न उद्धरण इस प्रसंग में अवधेय हैं :—

१. पाणिनि अपनी 'शिक्षा' में —"आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्ते विवक्षया। मनः कायाग्निमाहन्ति, स प्रेरयति मारुतम् ॥"

२. भर्तृहरि द्वारा उद्धृत शिक्षावाक्य :—"अन्तर्वर्तिना प्रयत्नेनोर्ध्वमुदीरितः प्राणो वायुस्तेजसानुगृहीताः शब्दवहाभ्यः शुषिराभ्यः सूक्ष्मांशं धूमसन्तानवत् संहन्ति। स स्थानेषु शब्दघनः संहन्यमानः प्रकाशमात्रया कयाचिदन्तःसंनिवेशिनः शब्दस्याविभक्तं बिम्बमुपगृह्णाति।"

अथवा, आपिशलि का—"नाभिप्रदेशात् प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रामन्नुरस्यादीनां स्थानानामन्यतमं स्थानमभिहन्ति। ततः शब्दनिष्पत्तिः।"

एक अन्य के अनुसार :—"वायुः कोष्ठस्थानमनुप्रदानमापद्यते। स कण्ठगतः श्वासतां नादतां वा।"

अपर आह :—"मनोऽभिहतः कायाग्निः प्राणमुदीरयति। नाभेरुद्यन् मूर्धन्यभिहतोऽन्येन पुनरुद्यता मरुताभिहन्यमानो ध्वनिः सम्पद्यते। क वा इति ख वा इति।"

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते।
व्यजनाद् वायुरिव स स्वनिमित्तात्प्रतीयते ॥ ११६ ॥

वायोः शब्दनव्यापारे महत्त्वं सूचयन्नपरं मतमाह :—

"शब्दो नित्यः, सूक्ष्मतया बुद्धाववस्थितश्च। सूक्ष्मत्वादेव हेतोस्तदुपलब्धिः स्वत एव न जायते। अस्याभिव्यक्तिः परमावश्यका। तच्च वायुना सम्पद्यते। आकाशरूपेण सूक्ष्मो भूत्वा वायोरेव परमाणवः नित्यशब्दरूपेण मनसि तिष्ठन्ति। तेषां पुनराविर्भाव आत्माभिव्यक्तौ जनितेन प्रयत्नेन वायुराश्रयस्थानात् प्रविभज्यते क्रियाभिरा-

विश्यते च । तेनैव ध्वनिरुत्पद्यते, यः खलु शब्दाभिव्यक्तौ हेतुः । स एव आत्मग्रहणार्थं श्रोत्रसंस्कारमपि करोति ।"

अत्रोदाहरणं व्यजनस्य; यथा तेन स्वाश्रये स्थितोपि वायुः परिचाल्य व्यज्यते, तथैव ध्वन्युत्पत्तिः ।

The eternal word is not perceived by the ears, because of its fineness and minuteness. But, as the already present air in a room becomes the object of feeling, only when it is moved by the fans; in the same way the eternal word, though remaining in the mind in its minute form always, becomes perceivable by the ears, only when it is activated by its own causes.

"शब्द नित्य और सूक्ष्म होकर बुद्धि में स्थित रहता है । आत्माभिव्यक्ति की इच्छा से प्रेरित प्रयत्न वायु को उत्तेजित करते हैं और अपने मूलाश्रय से पृथक् कर उसे गतिशील करते हैं । शब्दाख्य परमाणु तो पहले से ही हृदयाकाश या वायु के आश्रय में रहते हैं । क्रियावान् यह वायु उन्हें उसी तरह स्पष्ट अभिव्यक्ति प्रदान करता है जिस प्रकार कमरे में स्थित वायु तब तक गतिहीन सा लगता है, जबतक पंखा चलाकर उसे गतिमय न कर दिया जाए । तब ऐसा प्रतीत होता है, जैसे कहीं बाहर से वायु आगई हो । यही बात ध्वनिरूप शब्द की अभिव्यक्ति के सम्बन्ध में है ।"

टिप्पणी :—यहां 'व्यञ्जन' की अपेक्षा 'व्यजन' पाठ ही ठीक है । अन्यथा उपमा का सारा महत्त्व ही जाता रहेगा ।

तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता ।
विवर्त्तमाना स्थानेषु सैषा भेदं प्रपद्यते ।। ११७ ।।

सर्वसमवेतं सर्वोपचितं चौचित्यमतमुपस्थाप्योपसंहरति :—

"नायं केवलं वायोरेव चमत्कारो यः खलु शब्दाविर्भावाख्यः, नापि बुद्धेरेव केवलं, न च करणाभिघातादेरेव केवलस्य । सर्वेप्येते पक्षभेदा एव केवलम् । शब्दः खलु प्राणाधिष्ठानो बुद्ध्यधिष्ठानश्च । स तु द्वाभ्यां प्राणबुद्धिमात्राशक्तिभ्यां प्रतिलब्धाभिव्यक्तिरर्थं प्रत्याययति । तत्र प्राणो बुद्धितत्त्वेनान्तराविष्टः । स चोर्ध्वमभिप्रवृत्तो ज्वालावद्वर्णस्थानेषु प्रयत्नानुविधायी नित्यशब्दरूपत्वं लभन् विवर्त्तते ।

स च संसृष्टप्राप्तशक्तिविवर्त्तो न्यग्रोधधानादिवद् भेदं प्राप्नोति। एवं परस्मिन् निर्भागेऽभेदे च शब्दब्रह्मणि भेदानुरागमात्रं संनिवेशयति।"

The power of this fine and eternal word, which resides in Breath (prāṇa) and Mind (buddhi), strikes or moves at different places of articulation and becomes manifest in the form of different sounds.

"शब्द का आविर्भाव या अभिव्यक्ति केवल वायु, प्राण या बुद्धि के अकेले या पृथक् प्रयत्न का विपरिणाम नहीं है। इसमें इन सभी का यथास्थान योगदान रहता है। शब्द का सम्बन्ध बुद्धि और प्राण दोनों से है। उसकी जो शक्ति इन दोनों अधिष्ठानों में स्थित है, वही वायुप्रेरित स्थानों में अभिघात करती हुई पहले से संचित या प्रचित शब्दाख्य परमाणुओं को प्रेरित करके ध्वनिरूप में उत्पन्न करती है। ऐसी स्थिति में बुद्धि को प्राण में ही समवेत समझना चाहिए। अर्थात् बुद्धि और प्राण के समवेत प्रयत्न से ही वायु और करण (इन्द्रियां) गतिशील होकर ध्वनि या शब्द के अभिव्यंजन में प्रवृत्त होती हैं। इस प्रकार वही नित्य शब्द रूप ग्रहण करके प्लक्षन्यग्रोधादि की भांति कण्ठ्यतालव्यादि ध्वनि-भेदों को प्राप्त होकर अभिव्यक्त होता है।"

टिप्पणी :—'विवर्त्तमाना' शब्द विशेष अवधेय है। यह 'टकराने' के लिए न होकर 'विविधरूपेण वर्त्तमाना' के रूप में है। यहां 'वि' का प्रयोग कर्मप्रवचनीय के रूप में हुआ है।

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते॥ ११८॥

शब्दस्य शक्तेर्महत्त्वमुपस्थाप्य शब्दमेवोपस्करोति—

"विश्वमिदं लोकव्यवहाराधीनम्। लोकव्यवहारश्च शब्दानधिकृत्य तेन द्वारा वा प्रवर्त्तते। तदेव च जनानां परस्परं निबन्धनम्। निबन्धनमिदमनेन हेतुना शब्दद्वारैव सिद्धयति। अत उक्तं यत् शब्देष्वेवाश्रिता शक्तिर्विश्वास्यास्य निबन्धनीति।

"तस्या एव शक्तेर्नेत्रभूतः प्रकाशोपायभूतः प्रतिभात्मा बुद्धिविषयो वा शब्दः, यः खलु स्फोटनादभेदात्, नित्यकार्यभेदात्, पदचतुष्टयादिभेदाद् वा भिन्न इव प्रसिद्धस्तथाभूतः प्रतीयते च।"

It is the power of the words that keeps the world united, by becoming the sole medium of all the social behaviour. It is only through this eye (*i.e.*, the word) that all the diversity and differentiation of the mind is perceived. The word is the external manifestation of the mind. Through it one can see the divergent currents in the speaker's mind.

"विश्व या जगत् की स्थिति लोक के परस्पर व्यवहार से नितान्त संनद्ध है। और इस लोकव्यवहार का समस्त आधार है शब्द या भाषा के अस्तित्व पर। इस प्रकार लोकव्यवहार के माध्यम से विश्व को परस्पर ऐक्यसूत्र में आबद्ध करने वाली शक्ति इस शब्दव्यापार में ही है। इस लोकनिबन्धनी शक्ति का प्रकाशोपायभूत ही यह शब्द है, जिसका वास्तविक स्वरूप प्रातिभ है। अर्थात्, इसका अस्तित्व प्रतिभागत होने से ही नित्य है। प्रतिभात्मा होकर भी यह नामाख्यातिभेद से, नित्यकार्यादिभेद से, तथा स्फोटध्वन्यादिभेद से विभक्त सा होकर प्रयुक्त या व्यवहृत होता दिखाई देता है।"

टिप्पणी :—भर्तृहरि द्वारा उद्धृत—

"वागेवार्थं पश्यति वाग् ब्रवीति वागेवार्थं निहितं सन्तनोति।
वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुंक्ते॥"
"ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥"

—ऋग्वेद, १.१६४.३९

विशेष—शब्द को 'प्रातिभ' या 'प्रतिभात्मा' कह कर उसकी नित्यता को दार्शनिक आधार दिया गया है।

षड्जादिभेदः शब्देन व्याख्यातो रूप्यते यतः।
तस्मादर्थविधाः सर्वाः शब्दमात्रासु निश्रिताः॥ ११९॥

तदेव महत्त्वं विवृणोति—"संविज्ञानपदनिबन्धनो हि सर्वार्थः स्मृति-अभिजल्प-आकारादिनिरूपणया निरूप्यमाणो व्यवहारमवतरति। षड्जऋषभगान्धारादिस्वराणां परस्परं भेदः शब्देनैव व्याख्यातस्तत एव च रूप्यते निर्धार्यते वा। अतः प्रसिद्धपदनिबन्धना अप्रसिद्धपदनिबन्धना वा सर्वा अप्यर्थविधाः स्वप्रकाशिकासु शक्तिभूतासु शब्दमात्रासु नितरामाश्रिताः, संबद्धा वा।"

Even in the case of the six notes, *i.e.*, Ṣaḍja, Ṛṣabha Gāndhāra, etc., the difference is recognised with the help of the sounds (*i.e.* the words), though these may be made of non-distinct sounds. Thence, it is quite clear that all kinds of meanings, for their existence and expression, depend upon the powers of the words.

"प्रसिद्ध पदों का समस्त अर्थव्यवहार तो शब्दों के साथ सम्बद्ध होता ही है, अप्रसिद्ध पद के रूप में षड्ज, ऋषभ, गान्धार आदि स्वरों का प्रयोजन और अर्थ भी शब्दों पर ही आश्रित होता है। अतः कहा जा सकता है कि सभी प्रकार की अर्थमात्रा या अर्थविधा शब्द की तन्मात्राभूत प्रकाशिका शक्ति पर ही निर्भर करती है।"

टिप्पणी :—यास्क—'अर्थनित्यः परीक्षेत।'
वाक्यपदीय—१-१३ : "अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।"

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्त्तत॥ १२० ॥

शब्दब्रह्मण एव विश्वात्मकत्वमुपस्थापयन् पुनरपि प्राह—

"आम्नाये संहृतभोग्यभोक्तृशक्तिर्वागात्मैव बहुधा जगतः कारण-रूपेणोदितः। तेनैवेदं प्रसूयते, जीवनं गृह्णाति, व्यवहारसमर्थञ्च भवति। अत एव छन्दोभ्यः प्रथमं विश्वमजायतेत्येतन्निगद्यते।"

In the scriptures we find the mention of the speech-element as one, in which the powers of the Enjoyer and Enjoyed are submerged and which itself becomes the cause of this world in so many ways. For the Vedic scholars, it is this word-element from which all this universe takes its *birth*, retains its *life*, and becomes capable of mutual or *social behaviour*. That is why it is said that all this universe has evolved from the Chandas or the words of the Vedas.

"वेद के प्रवक्ता यह मानते हैं कि जगत् की सम्पूर्ण प्रक्रिया और परिणति शब्द के ही कारण, अथवा उससे प्रसूत होकर ही, होती है। इसीलिए बार-बार

यह कहा गया है कि छन्दों (वेदमन्त्रों) से ही विश्व की उत्पत्ति या गति-प्रक्रिया सम्भव होती है।"

टिप्पणी :—निम्न सूक्तियां अवलोकनीय हैं—

ब्राह्मणे यथा—"स उ एवैष ऋङ्मयो यजुर्मयः साममयो वैराजः पुरुषः। पुरुषो वै लोकः। पुरुषो यज्ञः। तस्यैता लोकम्पृणास्तिस्र आहुतयस्ता एव त्र्यालिखिता वै त्रयो लोकाः।" अथवा—"एष वै छन्दस्यः साममयः प्रथमोऽक्षन् वैराजः पुरुषो योऽन्नमसृजत्। तस्मात् पशवोऽन्वजायन्त। पशुभ्यो वनस्पतयो, वनस्पतिभ्योऽग्निः। तस्मादाहुर्न दारुपात्रेण दुह्यादग्निर्वा एष दारुपात्रम्।"

ऋग्भावमनुसरन्त्युपनिषद्—

"इन्द्राच्छन्दः प्रथमं प्रास्यदन्नं तस्मादिमे नामरूपे विषूची।
नाम प्राणाच्छन्दसो रूपमुत्पन्नमेकं छन्दो वहुधा चाकशीति॥"

पुनरपि ब्राह्मणः—

"वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम्।
अथेद्वाग्बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्चनाह॥"

वाक्यपदीये पुनः—

'विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः।' १-१।
अथवा—'एकस्य सर्वबीजस्य'। १-४। इत्यादि।

इतिकर्त्तव्यता लोके सर्वा शब्दव्यपाश्रया।
यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते॥ १२१॥

"सर्वमपि कर्त्तव्यप्रकारविषयकम् 'इदमेव कर्त्तव्यमिति' ज्ञानम् शब्देष्वेवाश्रितं विद्यते। लोके शब्दप्रकल्पितेन वस्तुना व्यवहारो, न तु सता शब्दागोचरेणेति। वाक्परिचयानन्तरं समाविष्टवाचां बालकानामपि पूर्वशब्दावेशात् भावनाया हेतोः, परम्परासंस्कारादिहेतोश्च तासु तास्वर्थक्रियासु अनाख्येयशब्दनिबन्धना प्रतिपत्तिर्जायते। सोऽपि जानाति शब्दद्वारैव स्वाभिप्रायनिवेदनम्।"

All the sociological and behavorial sense of the human beings depends upon the words, without which even their existence cannot be felt. There is nothing in this world, which becomes usable only because of its own existence and still lying

beyond the reach of the Word. Even in the children there arises the sense of cognition, related to the inexplicable words, in their different expressional behaviour. This becomes possible only because of the seeds already present in their minds, due to the previous births or sociological refinement or tradition.

"विश्व का समस्त कार्यव्यवहार शब्द पर ही आश्रित रहता है। अर्थ के बिना शब्द असत् के समान होने से, उसके होने और प्रचलित होने का अर्थ ही यह है कि विश्व का अभिप्रायप्रकाशनादि व्यवहार उससे ही सम्पन्न होता है। और, वह प्रकाशनव्यापार न चले तो विश्व की स्थिति निरर्थक हो जाए। इस बात को पूर्वजन्म से आहित भावना के कारण, अथवा संस्कार परम्परा और अभ्यास के कारण, बोलना आरम्भ करने वाला बालक तक बिना बताए जान जाता है।"

तुलनीय—'आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम्' इत्यादि।

आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम्।
स्थानानामभिघातश्च न विना शब्दभावनाम्॥ १२२॥

अधुना प्रतिभात्मिकां शब्दभावनां सर्वस्यापि वाग्व्यवहारस्य मूले प्रतिष्ठापयति—"अनादिश्चैषा शब्दभावना प्रतिपुरुषमवस्थितज्ञान-परिग्रहा, यस्याः कथंचिदपि पौरुषेयत्वं न संभवति। तथा हि अनुपदेश-साध्यः प्रतिभागम्य एव करणानामादिमो वारंवारं वानुभूयमानो विन्यासः, प्राणानां प्रयत्नजन्योच्चारणात्मकोऽध्यवसायः, वायोश्च भिन्नेषु मुखस्थानेषु पुनःपुनरभिघातः शब्दोत्पत्तिश्च। न चेत्स्यात् शब्दभावना, को ह्येतान् पुरुषधर्मान् कर्तुं प्रतिपादयितुं वा समर्थो भवेत्? शब्दभावनां विना तेषां प्रवृत्तिनिमित्तमेव न विद्येत, कुतः पुनराविर्भावस्तथाभूतानां प्रयत्नानाम्?"

The 'word-sense' may be treated as a seed in the mind. It exists there as a congenial thing or as a thing about the beginning of which nothing can be said definitely. This sense is not the product of the human mind itself. Even the sensory behaviour is congenial and intuitional. It is learnt without any teaching.

Thus, if the word-sense is not already there, then all the actions, like the first movement of the sensory organs, the upward process of breath, and the striking at different places of pronunciation by the air etc., become impossible. Because that sense is the stimulating cause of all the speech-behaviour.

"यदि शब्द की अस्तित्व भावना, या शब्द के पीछे छिपी उसके प्रयोग की प्रेरक भावना, न हो तो शब्दोच्चारण या ध्वनि के उत्पादन में होनेवाला सारा प्रयत्न ही व्यर्थ हो जाए। तब न तो इन्द्रियां या उच्चारणतन्त्र ही अपने कार्य में प्रवृत्त होंगे, न ही प्राण गतिशील होंगे, और न ही वायु द्वारा मुखके विभिन्न स्थानों में अभिघातादि ही किए जा सकेंगे। अर्थात् प्रयोक्ता के मन में प्रयोग या अभिव्यक्ति की निश्चित भावना की उपस्थिति का ही परिणाम है कि वाग्व्यापार की कोई भी गतिविधि या प्रक्रिया सभव हो पाती है।"

टिप्पणी :—१. अगले दोनों श्लोकों में भी इसी भावना को दूसरे शब्दों में पुष्ट किया गया है।

२. 'आद्यः' के दो अर्थ हैं: 'जन्म का आरम्भिक प्रयास' या 'प्रत्येक उच्चारण में होने वाला आरम्भिक प्रयास'।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ १२३ ॥

शब्दस्य सर्वार्थमूलकत्वं सर्वज्ञानमूलकत्वं च पुनरुपस्थापयति :—

"एवंभूतः प्रयोक्तृबुद्धिस्थो ग्रहीतृबुद्धिस्थो वा कश्चन प्रत्ययो लोके नास्ति यः शब्दत्वमननुगमन्नेव स्थातुमर्हति। यतः सर्वमपि ज्ञानं, प्रयोक्तुर्ग्रहीतुर्वा, शब्दानां प्रत्यर्थनियतासु शक्तिषु शब्दानुविद्धेन शक्त्यनुपातिना ज्ञानेन आक्रियमाण उपगृह्यमाणो वा वस्त्वात्मा व्यक्तरूपावभास इव जायते। स च निमित्तान्तरादाविर्भवत्सु श्रुतिबीजेषु स्मृतिहेतुर्भवति। सुप्तावस्थायामपि ज्ञानवृत्तिप्रबन्धः सूक्ष्मां वृत्तिमुपालभमानेभ्यः शब्दभावनाबीजेभ्यस्तस्यामवस्थायां सम्भाव्यते।"

"तदेतत् संज्ञानं शब्दप्रकृतिविकारभावेनाविर्भावतिरोभावावजस्रं प्रत्यनुभवति।"

There is no cognition in the world, which does not become the subject of the word. All the knowledge is illuminated or glorified by the 'word', as though it is the piercing and uniting thread of the former, so as to make it into a necklace.

We may say, that without the 'word' all the cognition or knowledge will remain merely as darkness.

"प्रत्यय या ज्ञान-प्रतीति दो प्रकार की मानी गई है। जागृत अवस्था में तो शब्दभावना के कारण ही हमारा सारा वाग्व्यापार चलता है। भावना का साथ न होने पर अनुभूति में आनेवाले ऐसे अनेक तथ्य होते हैं, जिन्हें हम शब्द-रूप द्वारा व्यक्त नहीं करते, यद्यपि उन्हींके साथ अनुभूत अन्य सत्यों को हम शब्द-रूप से व्यक्त कर रहे होते हैं। इसके साथ ही प्रसुप्तावस्था में भी हम सत्यों या स्वप्नों को अनुभव कर रहे होते हैं। उनका वर्णन भी शब्दों के साथ इसलिए नहीं किया जाता कि उस समय शब्दभावना के बीज भी सूक्ष्मता ग्रहण कर चुके होते हैं। इसीलिए उसे तमोरूपा या तामसी अवस्था कहा गया है। परन्तु यह जागृतिमूलक और सुषुप्तिमूलक उभयात्मक ज्ञान ही शब्दभावना के बिना स्थित नहीं रह सकता, ना ही स्वरूप ग्रहण कर सकता है।"

टिप्पणी :—उत्पलदेव निम्न वचन 'आगमोक्त' कहकर प्रयुक्त करते हैं :

"न तैर्विना भवेच्छब्दो नार्थो नापि चितेर्गतिः ॥"

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ १२४ ॥

वाचो हि सर्वप्रकाशकत्वं ज्ञानस्य प्रकाश्यत्वञ्चोपस्थापयन् तयोरविच्छेद्यतां घोषयति—"यथा प्रकाशकत्वमग्नेः स्वरूपं, चैतन्यं चैवान्तर्यामिणः, तथैव सर्वस्य ज्ञानस्यापि स्वरूपं वाग्रूपमात्रमेव । याप्यचेतितावस्था तस्यामपि सूक्ष्मो वाग्धर्मोऽनुवर्त्तत इति पूर्वमेवोक्तम् । आत्माभिव्यक्तिकाले वा स्मृतिकाले वा जायमानः सर्वोऽपि प्रत्यवभासो वाग्रूपतामेवाश्रयति, तया विना तस्यावस्थानासम्भवात् । भिन्नरूपाणां चानुपकारिणामात्मान्तरात्मनोरितरेतरस्य वस्तु-मात्राज्ञाने प्रत्यवभासमाने यदुत्तरकालमनुसंधानं प्रत्यवमर्श एकार्थकारित्वविभागेन शक्तिसंसर्गयोगोपग्रहस्तद् वाग्रूपतायामेव

बद्धम् । साह्यनुसन्दधाना प्रत्यवमृशन्ती च सर्वेप्यर्थकारिणि प्रत्यये शक्त्यपोद्धारकल्पनया भेदसंसर्गमात्रां न विजहाति ।"

If the knowledge were not mixed up with the word, their individual vague cognition, and its linking up with each other, would not become auxiliary, in the act of illumination. It is only the identity of the knowledge and the word that makes the process of identification easier.

"ज्ञान की जाग्रत् और सुप्त स्थितियों की चर्चा हो ही चुकी है। उभयात्मक ज्ञान की अवस्थिति वाक् या भाषा के माध्यम से ही होती है। आत्माभिव्यक्ति और स्मृतिकाल में भी वाक् ही समस्त व्यवहार का माध्यम बनती है। अर्थात् ज्ञान का सभी अवभास शब्द या वाक् के रूप में ही स्थित रहता है। उसी के द्वारा हर प्रकार का विचार-विमर्श हो सकता है; फिर वह चाहे व्यक्त हो या अव्यक्त। यदि वाक् न हो तो यह सब प्रकाशन व्यापार सम्भव ही न हो। तब जैसे प्रकाश ही संसार से मिट जाएगा।"

सा सर्वविद्याशिल्पानां कलानां चोपबन्धनी ।
तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते ॥ १२५ ॥

वाचः सर्वाभिव्यञ्जकत्वं सर्वनिबन्धकत्वं च विवृणोति—

"विद्याशिल्पकलादिभिर्लौकिकेषु वैदिकेषु चार्थेषु मनुष्याणां प्रायेण व्यवहारः प्रतिबद्धः। मनुष्याधीनाश्चेतरस्य भूतग्रामस्य स्थावरजङ्गमस्य प्रवृत्तयः। विद्यादयश्च वाग्रूपायां बुद्धौ निबद्धाः घटादीनां चाभिनिष्पादने प्रयोज्यप्रयोजकानामुपदेशसमीहादि सर्वं वाग्रूपतानुसारेण प्रकल्पते।"

Human transactions, in regard to the worldly things as well as in regard to the Vedic things, take place through the Sciences, Arts and Crafts. The behaviour of all the rest of the world depends upon the human behaviour itself. All the Sciences and Arts etc. are dependent, for their organised 'form' on the Speech-form, and are fixed in the mind as such.

It is only due to this interdependability of the words that all the things seem to be separated or indivisualised amongst themselves.

"लौकिक और वैदिक प्रयोजनों में प्रायः मनुष्यों को विद्या, शिल्प, कला आदि से वास्ता पड़ता रहता है, या उनका व्यवहार इनमें प्रतिबद्ध होता है। शेष सभी मनुष्येतर स्थावर-जंगम की प्रवृत्ति मनुष्य की प्रवृत्तियों के अधीन, या उसके द्वारा प्रेरित, होती है। उक्त विद्यादि वागात्मा बुद्धि में निबद्ध होते हैं। इस वाक् के द्वारा ही प्रत्येक निर्मित वस्तु के प्रयोज्य-प्रयोजक आदि की कल्पना की जाती है।"

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्त्तते।
तन्मात्रामनतिक्रान्तं चैतन्यं सर्वजातिषु ॥ १२६ ॥

वाचो हि चैतन्यमिव स्वरूपं स्पष्टीकरोति :—"सा एषा सर्वविद्याशिल्पानां कलानां चोपबन्धनी वाग्रूपता संसारिणां प्राणिनां संज्ञा चैतन्यम्। सा च शरीराद् बहिरन्तश्च वर्त्तते, व्यापकत्वात्। सा च शब्दरूपेण स्थिता। अन्तःसंज्ञिनामपि सुखदुःखसंविन्मात्रा यावद् वाग्रूपतानुवृत्तिस्तावदेव भवति। अतो वाचैव युक्ता नरतिर्यगादयः प्राणिनश्चेष्टन्ते, न तु स्थावरा वृक्षगुल्मलतादयः।"

The Speech is nothing but the consciousness of the world. It exists within and without. The consciousness of all types of beings does not go beyond the reach of the Speech-element.

It is because of the speech-form of the consciousness, that the distinction becomes possible in between the *sentient* and *insentient* beings.

"सब विद्याशिल्पादि की उपनिबन्धनी यह वाक् संसारियों की चेतना की तरह है। बाह्य रूप से सचेतन प्राणियों का तो इसके बिना व्यवहार चलता ही नहीं, अन्तश्चेतना वाले मानवातिरिक्त प्राणी भी इस वाक् के किसी न किसी रूप का ही सहारा लेते हैं। जिस तरह चैतन्य के न रहने पर प्राणी 'विसंज्ञ' हो जाता है, उसी तरह वाक् के बिना भी उसकी चेतना अचेतन जैसी हो जाती है। चेतनहीन वृक्षादि को ही वाग्रूपता की आवश्यकता नहीं होती। अतः वाग्रूपता के अभाव का अर्थ है चेतनाहीनता की स्थिति।"

अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठ्यकुड्यवत् ॥ १२७ ॥

"वाग्रूपतानुविद्धं चैतन्यमेव अर्थवतीषु क्रियासु प्राणिनः प्रेरयति। वाग्रूपतया स्थितस्य चैतन्यस्योत्क्रान्तौ मरणादिकाले वाऽयं प्राणी विसंज्ञोऽयमितिकृत्वोच्यते। तदा स काष्ठ्यकुड्यवदेव विसंज्ञो विचेतनो वा जायते।"

It is the word that urges all the beings towards the purposeful activity. If that were absent, everything would become insentient, like a piece of wood or a wall.

"वाक् रूप ग्रहण किया हुआ चैतन्य ही सब प्राणियों को सभी प्रकार की सार्थक क्रियाओं में प्रवृत्त करता है। यदि यह वाक्रूपी चैतन्य न रहे, तो प्राणी काठ की भांति चैतन्यहीन और निष्प्राण रह जाए। वाक् उसकी सचेतनता का प्रमाण है।"

प्रविभागे यथा कर्त्ता तथा कार्ये प्रवर्त्तते।
अविभागे तथा सैव कार्यत्वेनावतिष्ठते ॥ १२८ ॥

जागृतिस्वप्नयोर्वाग्रूपतैव व्यवहारसाधनम् : "प्रविभागे साध्य-साधनादिविभागे यथा कर्त्ता तया वाचा व्यावहारिके कार्ये सर्वविध-व्यवहारक्रियायां वा प्रवर्त्तते, तज्जाग्रदवस्थायामेव सम्भवम्। अविभागावस्थायां निद्रावस्थायां वा सैवाविषया वाग् बाह्यवस्तुस्वरूपा सती निर्वृत्तिविक्रियाप्राप्तिषु कर्मभावं प्रतिपद्यते।"

एवं च स्वप्नजागृत्योरुभयोरपि कर्मत्वं व्यवहारश्च वाचैव निवर्त्तते।

Just as, while awakened, an agent acts on the objects of all actions through the word-form only, in the same way, while asleep it is the word itself, which becomes the object of all actions. While awakened, we can differentiate and distinguish the objects mutually, but while asleep we do not have the real objects before us. It is, on the other hand, the word itself,

which becomes the object of the actions of Production, Modification, and Reaching.

"जिस प्रकार साध्यसाधनादि के प्रविभाग में समर्थ रहने पर, अर्थात् जाग्रदवस्था में, कर्त्ता वाणी के द्वारा लोकव्यवहार को सम्पन्न करता है, उसी प्रकार अचेतन अवस्था में, अर्थात् निद्रादि में, साध्यसाधनादि विभाग में असमर्थ होने पर भी कार्य या कर्म की दृष्टि से वाणी ही सूक्ष्मावस्था में काम आती है। वहां भी 'गौ' आदि स्वप्नगत वस्तुओं का प्रविभाग अभीष्ट होता ही है, भले ही उसे बोलकर विभक्त एवं व्यक्त न किया जा रहा हो।"

टिप्पणीः—भर्तृहरि द्वारा उद्धृत वचन—

'प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान्।
सर्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवर्त्तते' ॥१२७॥

स्वमात्रा परमात्रा वा श्रुत्या प्रक्रम्यते यथा।
तथैव रूढतामेति तथा ह्यर्थो विधीयते ॥ १२९ ॥

स्वमात्रावादिनां परमात्रावादिनां च दर्शनमुपस्थाप्य वाचैव ह्यर्थो विधीयते, इत्युपन्यस्यति—"स्वमात्रावादिनां द्विविधं दर्शनम्। केषांचिन्मते सर्वो हि विकार आत्ममात्रेति। स एव प्रतिपुरुषमन्तःसन्निविष्टो बाह्य इव प्रत्यवभासते। रूढत्वादेव तस्य बहिरन्तरिति व्यवहारः। एतत्खल्वेकत्वे अमूर्त्तत्वे वा न संभवति। अन्येषां पुनः मते सर्वप्रबोधरूपः सर्वप्रभेदरूपश्चैकस्य चितिक्रियातत्त्वस्यायं परिणामः। इत्येतत् स्वमात्रादर्शनद्वयम्।

"परमात्रावादिनामपि दर्शनं द्विविधम्। एकेषां मते चैतन्यं भूतयोनिस्तिलेभ्यो रसवत् प्रविभज्यते। अन्येषां च—अग्नेः स्फुलिंगाः, वायोरभ्रघनाः, पृथिव्या वा सालादय इव चैतन्यात् सर्वं प्रविभज्यते।

"स्वमात्रापरमात्रावादिनामेतद् दर्शनं नानाभाष्येभ्यः प्रतिपत्तव्यम्।"

"प्रतिपत्तॄणां प्रतिपत्तिक्रमेण स्वान्तःसन्निवेशिना शब्देन स्वस्यार्थः सुखदुःखादिभावेन नानाप्राणिषु बहुधा प्रक्रम्यते। यथा च प्रक्रम्यते तथैव रूढतामेति। तद्यथा परिहासकाले स एव वाक्यः सुखमुत्पादयति स्वार्थेन, अन्यस्मिंस्तु काले स एव दुःखोत्पादी भवति,

तदपि स्वार्थेनैव । लोकभावनासमयेन स्वार्थप्रसिद्धिः । तथाभूतया श्रुत्यैवार्थो विधीयते कल्प्यते संस्क्रियते च ।"

Svamātrāvādins, or the Selfists, say that *either* all this creation is nothing but the manifestation of the Self, *or* all this resultant knowledge and diversity is due to the Consciousness.

Paramātrāvādins, or Theists, believe that this universal manifestation is *either* in the form of an extraction, *or* in the form of a thing illuminated by the omnipresent Consciousness.

Like the Consciousness, the Word is the source of all this diversity and knowledge, in one way or the other. The same word may convey two or more different meanings, in different contexts. Primary, amongst those, is that which becomes deep-rooted in the popular usage. The very ascertainment of the meaning is based on the sonic manifestation of the word.

But, Word is eternal in both the theories. Śruti is its manifestation only.

"स्वमात्रावाद के रूप में दो मत हैं । **प्रथम** : सब विकार आत्मा या पुरुष के ही हैं, और वही बाह्य और अन्तः के विभाग से बंटा-सा दीखता है । **द्वितीय** : सब प्रबोध और सब प्रभेद एक ही चैतन्यात्मा का परिणाम है ।

"परमात्रावाद में भी दो मत हैं । **प्रथम** : महाभूतादिविकार चैतन्य में ही स्थित होते हैं और उससे ही तिल में से तैल की भांति निकलते हैं । **द्वितीय** : अग्नि से चिनगारी, वायु में से बादल, और पृथ्वी में से सालादि वृक्षों की भांति चैतन्य से यह सब दृश्यमान संसार पृथक् होकर प्रविभक्त होता है ।"

"अतः स्पष्ट है कि प्रतिपत्ताओं के मन में स्थित शब्द द्वारा प्रतिपत्तिक्रम में अपना अर्थ सुखदुःखादि के रूप में विभक्त-सा प्रकट किया जाता है । लोक-प्रसिद्धि से यही अर्थ रूढ़ता को प्राप्त कर लेता है । यथा परिहास काल में जो वाक्य सुख का हेतु बनता है, अन्यत्र वही दुःखोत्पादक भी बन जाता है । अर्थ शब्द में, दोनों ही मतों में, अन्तःस्थित रहता है ।"

अत्यन्तमतथाभूते निमित्ते श्रुत्युपाश्रयात् ।
दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा ॥ १३० ॥

सर्वः खलु शब्दार्थः कथं श्रुतिमुपाश्रितः, इति कथयति—"श्रुतिरेव हि सर्वं शब्दार्थं स्वरूपपदात्मनि संनिविष्टं दर्शयति ।

सा तमर्थं जनयतीव । सा हि तस्यां प्रत्याय्यात्मना नित्यमवस्थिता । न च बाह्यवस्तुगतं सदसत्त्वं श्रुतिरपेक्षते, नापि विपर्ययाविपर्ययौ । तथा ह्यलातचक्रेऽपि सर्वप्रदेशव्याप्तिरूपा च क्रियादिशब्दरूपभावनानुगता च श्रुतिरवतिष्ठमाना अलातचक्रादिशब्दानां व्यावहारिकाणामर्थवत्तां प्रकल्पयति । तच्छ्रुतिबीजाभिमुख्ये तथाभूतनिमित्तया श्रुत्या प्रकल्पितो वस्त्वाकारः सत्यप्यनुमानबीजलीयस्त्वे रूढीभवति । अत्यन्तमसत्सु च निर्ज्ञातेषु शशविषाणादिषु श्रुतिरेवार्थं जनयति, प्रकल्पयति, स्वात्मन्यवरुणद्धि च ।

"शब्देष्वर्थात्मा सनिबन्धनो निबन्धनो वा नित्यमेव संनिविष्टः । सत्यसति वाऽर्थे प्रतिपुरुषं शब्देभ्यः स्वप्रत्ययानुकारेण भावनानुविधायिनी भिन्नरूपा प्रतिपत्तिरुपपद्यते ।"

Thus, it is the 'hearing', which clarifies the meaning hidden behind the word, fixed in our mind. It is mistaken as producing the meaning at the time of pronunciation. The meaning itself is eternally present with the word. This can be proved by the fact that even when there is no real or rational basis for the so-called meaning, we understand it anyhow merely from the pronounced word. We can take the case of 'the circle of fire', which denotes to a spreading state and is not precisely defined, but still which conveys a definite meaning, howsoever imaginary it may be. That means that even the hypothetical and non-existant things may be denoted by the words, as their meanings. And, this is so because of their sonic presentation only. Meaning may reside in the words, as fixed or unfixed.

"निमित्त के उपस्थित रहने पर शब्द से अर्थ की प्रतीति होती ही है । परन्तु निमित्त के नितान्त अस्पष्ट होने पर भी, अर्थात् आकारादि की नितान्त रहितता होने पर भी, शब्द से अर्थ की प्रतीति होती है । ऐसा शब्द के श्रुतिरूपमात्र के कारण होता है । अर्थात् शब्द की श्रुतिमात्र से हो जाने वाली यह अर्थ-प्रतीति तभी सम्भव है, जबकि शब्द में स्वयं ही अन्तःसंनिविष्ट अर्थ की स्थिति स्वीकार की जाए । यह प्रतीति वस्तु के होने या न होने से सम्बद्ध नहीं होती । जिस प्रकार 'अलातचक्र' में चक्र का अर्थ 'रथचक्र' न होने पर भी उस प्रकार की भावना स्वतः आ जाती है, उसी प्रकार शशविषाणादि के नितान्त असिद्ध होने पर

भी उन शब्दों के उच्चारण पर उनका अर्थ ग्रहण हो ही जाता है। अतः अर्थ शब्द के श्रुतिरूप में अन्तःसंनिविष्ट होकर ही स्थित रहता है।"

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते॥ १३१॥

शब्दस्य महादेवत्वमुपस्करोति :—"इह द्वौ शब्दात्मानौ—नित्यः कार्यश्च। तत्र कार्यो व्यावहारिकः, पुरुषस्य वागात्मनः प्रतिबिम्बोपग्राही। नित्यस्तु सर्वव्यवहारयोनिः संहृतक्रमः सर्वेषामन्तःसंनिवेशी विकाराणां प्रभवः कर्मणामाश्रयः सुखदुःखयोरधिष्ठानं सर्वत्राप्रतिहतशक्तिः घटादिनिरुद्ध इव प्रकाशः, सर्वमूर्तीनां प्रकृतिः, नित्यप्रवृत्तप्रत्यवभासस्वप्नप्रबोधानुकारी प्रवृत्तिनिवृत्तिपदाभ्यां पर्जन्यवद् दवाग्निवच्च प्रसवोच्छेदशक्तियुक्तः सर्वेश्वरः सर्वशक्तिमान् महान् ऋषभः शब्दवृषभः। तेनैव वाग्योगविदां प्रयोजनं ग्रन्थिच्छेदश्च।"

In Grammar the word is taken as of two kinds : Eternal and Resultant. The latter is that, which is current in worldly usage. It bears the resemblance with the Self, *i.e.* with the mentally fixed word. While the former one is the source of all the usage and application, it has no sense of sequence, no divisibility, producing transformation, acts as substratum of every action, all powerful, all presiding, and great like the Great Self itself. It is this 'word', which is adorable to all those, whosoever are interested in the knowledge of the construction and function of the language or speech. They are eager to establish their union with this Eternal Word only.

"शब्द का वास्तविक स्वरूप प्रयोक्ता की अपनी आत्मा या बुद्धि में स्थित है। या, वह प्रयोक्ता की आत्मा बनकर स्थित है। यही रूप 'नित्य' कहलाता है। 'कार्य' शब्द का वह रूप है जो व्यवहार में आता है और जो श्रुतिरूप में प्रतिबिम्बित होता है। यह अन्तरात्मास्थित शब्द ही महान् वृषभ या ऋषभ है। इसी को वाक् के कुशल प्रयोक्ता साधना चाहते हैं। विविध रूपों में यही विश्वप्रक्रिया का मूल है।"

टिप्पणी :—देखें महाभाष्य–'चत्वारि शृंगा'० (ऋ० ४-५८-३) की व्याख्या।

तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते ।। १३२ ।।

'तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते'-इति पूर्वोक्तमेव पुनः उपसंहारे प्रस्तौति—

"उक्तरीत्या दर्शितमाहात्म्यस्य शब्दस्य व्याकरणादिहेतुको यः संस्कारः, शब्दापशब्दविवेकश्च, तत्सर्वं परमात्मनः सिद्धिरूपेणैव समवस्थितम् । शब्दब्रह्मणः षड्भावविकारात्मिकां प्रवृत्तिं ज्ञात्वैव तस्य तत्त्वामृतमास्वादितुंशक्यते । व्यवस्थितसाधुभावेन हि रूपेण संस्क्रियमाणे शब्दतत्त्वेऽपभ्रंशोपघातापगमादाविर्भूते धर्मविशेषे नियतोऽभ्युदयः । तदभ्यासाच्च शब्दपूर्वकं योगमधिगम्य प्रतिभां तत्त्वप्रभवां भावविकारप्रकृतिं सत्तां साध्यसाधनशक्तियुक्तां सम्यगवबुद्धय नियता क्षेमप्राप्तिरिति ।"

Once the essence of the word is purified by the form, the correctness of which is established and particular merit is manifested by the disappearance of the obstacles, in the shape of incorrect forms, well-being is certain. Through repeated practice of it, after attaining union with the speech-element through the correct word, and after fully understanding the Intuition, which derives from the speech-element, attainment of the supreme Good (Kṣema) becomes certain.

"ऊपर बताई बातों से शब्द का अपना ब्रह्मत्व और माहात्म्य स्पष्ट है । उस महत्त्व वाले शब्दब्रह्म का शब्दसंस्कार या अपभ्रंशादि से रहित ज्ञान धर्म का साधक होने से स्वयं परमात्मा की सिद्धि देने वाला है । अर्थात् व्याकरण का ज्ञान स्वतः परमात्मा की सिद्धि ही है । उसके निरन्तर अभ्यास द्वारा एवं शब्दमय योग के द्वारा संस्कृत प्रतिभा से षड्भावविकारादि का या साध्यसाधनादि शक्तियों का सम्यक् ज्ञान उपलब्ध करके उस शब्दब्रह्म की वास्तविक अनुभूति ली जा सकती है ।"

टिप्पणी :—तुलना करें : 'तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते ।' (वा० १-२२) ।

न जात्वकर्तृकं कश्चिदागमं प्रतिपद्यते ।
बीजं सर्वागमापाये त्रय्येवातो व्यवस्थिता ।। १३३ ।।

ऋग्यजुःसामाभिधा त्रयी कथं सर्वशास्त्राणामागमानां वा मूलम् ?, इति स्पष्टीकरोति—

"सर्वप्रवादेष्वागमवाक्यानां प्रणेतृपरिग्रहेण पौरुषेयत्वमभ्युपगम्यते । वेदवाक्यानि तु चैतन्यवदपौरुषेयाणि स्वीक्रियन्ते । आगमानां प्रणेतृषु विच्छिन्नेषु आगमान्तराणामनुसंधाने वेदवाक्यान्येव बीजवदवतिष्ठन्ते । अतो बीजरूपेण सर्वागमानां त्रयी एव स्वीक्रियते ।"

In all systems, someone is supposed to be the author of the written traditions or Śastras. Thus, they are all of human origin. Vedic mantras, on the other hand, are like consciousness itself, not created by any person. When the authors and their written traditions will perish or disappear, these vedic mantras or thoughts will still serve as the seeds for the establishment and formation of other traditions or Śastras.

"कोई भी सामान्य आगम या शास्त्र विना कर्त्ता के नहीं माना गया है । उनके ये कर्त्ता पुरुष होने से वे सब पौरुषेय शास्त्र माने जाते हैं । किन्तु वेदों और वेदवाक्यों को अपौरुषेय स्वीकार किया गया है । पुरुषकर्त्ताओं के विनाश पर, या स्वयं उन आगमों के विनाश पर भी, वेदवाक्य बीज के समान बचे रहते हैं और नए-नए आगमों के निर्माण की प्रेरणा का स्रोत बने रहते हैं । इसीलिए सभी आगमों का मूल 'त्रयी' को स्वीकार किया जाता है ।"

टिप्पणी :—इस प्रसंग की स्पष्टता के लिए देखें : इसी काण्ड के श्लोक सं० ५-६-७ ।

अस्तं यातेषु वादेषु कर्तृष्वन्येष्वसत्स्वपि ।
श्रुतिस्मृत्युदितं धर्मं लोको न व्यतिवर्त्तते ।। १३४ ।।

श्रुतिस्मृत्योर्लोकप्रसिद्धत्वं लोकस्वीकरणं च विवृणोति : "इह प्रणेतृवदागमानामपि प्रवादेषु विच्छेदोऽभ्युपगम्यते । तेषु प्रत्यस्तमि-

तेषु यावदन्ये प्रणेतारो नोत्पद्यन्ते, आगमान्तराणि च न प्रतायन्ते, तत्राप्यन्तराले श्रुतिविहितानि कर्माणि स्मृतिनिबन्धनांश्च भक्ष्याऽभक्ष्यादीन् नियमान्नातिक्रामन्ति शिष्टाः सामान्या वा जनाः।"

All the schools believe that, like the authors, the written traditions or Śastras can also disappear. When they come to an end, and before other authors give rise to new traditions or Śastras, there might be an interval, during which cultured people do not violate the rites taught in the Scriptures, *i.e.* Śruti and Smṛti or the rules of behaviour written therein.

"जिस तरह कर्त्ता पुरुष अनित्य हैं, उसी तरह उनकी कृतियां—आगम—भी विनष्ट हो सकते हैं। जब तक नए प्रणेता सामने न आएं, तब तक नए आगम नहीं बनते। परन्तु इस पर भी धर्म का लोक से उच्छेद नहीं होता। कारण यह है कि लोक धर्म का प्रमाण, उस दशा में, श्रुति और स्मृति से करता है। यह उसके स्वाभाविक अभ्यास के कारण होता है।"

ज्ञाने स्वाभाविके नार्थः शास्त्रैः कश्चन विद्यते।
धर्मो ज्ञानस्य हेतुश्चेत्तस्याम्नायो निबन्धनम्॥ १३५॥

आम्नायस्य धर्ममूलकत्वं ज्ञानप्रभेदमूलकत्वं च विज्ञापयति—

"यदि ज्ञानं स्वाभाविकं स्वीक्रियते, तस्य चोपलब्धिर्विनैवान्यानि शास्त्राणि पठित्वा कपिलादिभ्योऽन्येभ्यो वा जायते, ते च शास्त्रप्रवृत्तौ स्वाभाविकादेव ज्ञानाद् हेतोः प्रवर्त्तन्ते, ततः सिद्धमेवेदं यत् ज्ञानार्थं शास्त्रादिकं निरुपयोगमेव। न किमपि तस्य प्रयोजनम्। यदि च कपिलादीनामन्यानां वा सामान्यानां जनानां शास्त्रादिप्रवर्त्तनसामर्थ्यात्मकं ज्ञानं धर्ममूलकत्वात् प्रसरति, ते च धर्महेतुत्वादेव ज्ञानोत्कर्षं लब्ध्वा निर्माणे समर्था भवन्ति, तदाऽपि शास्त्रैरन्यकृतैर्न कोऽप्यर्थः सिध्यति। यतः धर्मे शास्त्रेष्वसत्स्वपि आम्नाया एव प्रमाणीभूतास्तिष्ठन्ति। अतो ज्ञानस्योत्कर्षहेतुरपि वेदज्ञानमेव, न पुनः शास्त्रान्तरज्ञानम्। एवं हि वेदानामाम्नायानां वा सर्वबीजत्वं सिद्धमेव।"

If the Knowledge is taken as spontaneous, there would be no purpose left in accepting the Śastras as its source. And if the spiritual uplift is thought to be the cause of the knowledge. Veda is there as a binding element or as a source of all spiritual attainment.

Thus, in both the ways, there is no purpose in Śastras being accepted as the source of the knowledge.

"शास्त्रप्रणेताओं के ज्ञान को यदि स्वाभाविक मानें, तब भी शास्त्रों की उपयोगिता सिद्ध नहीं होती। क्योंकि जिस तरह वे अन्य शास्त्रों की सहायता के बिना स्वाभाविक रूप में ही सांख्यादि शास्त्रों की रचना में समर्थ हो सकते हैं, उसी तरह अन्य प्राणी भी वह सामर्थ्य प्राप्त कर सकते हैं। इसके विपरीत, यदि यह माना जाए कि धर्म के द्वारा उन्हें ज्ञान की उपलब्धि होती है, तब भी शास्त्रों का कोई प्रयोजन नहीं ठहरता। क्योंकि धर्म का स्वाभाविक और सरल ज्ञान वेदों से होता है, न कि अन्यान्य शास्त्रों से। इस प्रकार ज्ञान को स्वाभाविक मानें या धर्मोदित, मनुष्यकृत शास्त्र की उपयोगिता उस दृष्टि से नितान्त असिद्ध ठहरती है। इस प्रकार भी शास्त्रों की अपेक्षा वेद ही सर्वबीज और प्रामाणिक ठहरते हैं।"

वेदशास्त्राविरोधी च तर्कश्चक्षुरपश्यताम्।
रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते॥ १३॥

वाक्यार्थनिर्धारणे रूपस्य तर्कस्य च स्थानं ज्ञापयति : "उत त्वः पश्यन्न ददर्श वाचं"—इति श्रुत्यनुसारं ये पश्यन्नपि न पश्यन्ति तेषां कृते आगमवाक्यानामपि ग्राह्याग्राह्यशब्दार्थादिव्यवस्था वेदार्थदर्शनं वा तर्केणैव सम्भवति। स च तर्को वेदशास्त्रैरविरोधी भवन्नेव अर्थात् श्रुतिलिङ्गादिमनुसरन्नेव सत्यपथे नयति, नान्यथा। केवलोऽनुमानगम्यस्तर्कोऽनाश्रितो वेदपथं स अनाश्रयणीयः।

"तर्कं विना वाक्यार्थः संभवति न वा ?—अस्य प्रश्नस्यायमुत्तर.। ये हि खलु श्रुतिमात्रादेव वाक्यार्थज्ञानेऽसमर्थास्ते वाक्यस्य रूपमात्रमेवाभिव्यक्तं दृष्ट्वा न कंचिदप्यर्थं ज्ञातुं समर्था भवन्ति। यतः रूपमात्रमाश्रित्याधिगतोऽर्थः सन्देहाश्रितोऽनिश्चितश्च भवति। तस्य प्रामाण्यं तु वेदसाक्ष्येणैव संभवति। तच्च दर्शनं तर्काश्रितम्।"

The meaning of a statement does not become clear from its mere 'form'. That type of meaning might be dubious and uncertain. Its undoubtedliness or certainty may only be estalished by the corroborating evidence of Vedas. This becomes the subject matter of Logic. But that logic itself becomes a true means, in the hands of those who cannot see the reality from the formal appearance only, if it does not contradict, and rather if it follows, the Vedic tradition.

"देखते हुए भी जो लोग समझ नहीं पाते, उनके लिए वेद-वाक्यों का अर्थ केवल ध्वनिरूप या उच्चरित रूप मात्र से ही ग्रहण करना सम्भव नहीं हो पाता। यह बात सामान्य वाक्प्रयोग पर भी लागू होती है। ऐसे समय अर्थज्ञान के लिए तर्क का आश्रय लेना पड़ता है। किसी भी प्रसंग में यह तर्क मूल ग्रन्थ की, या मूल प्रसंग की, अन्तर्हित और एकसूत्र भावना से विपरीत नहीं पड़ना चाहिए। अतः वेद-वाक्यों के अर्थ प्रसंग में भी यह तर्क उनकी अपनी भावना और परम्परा के अनुकूल हो, तभी ठीक रहेगा। तभी अर्थ स्पष्ट हो सकेगा।"

टिप्पणीः— इसी को आजकल 'अन्तः साक्ष्य पर आश्रित अर्थ' कहा जाता है।

सतोऽविवक्षा पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी।
इति न्यायो बहुविधस्तर्केण प्रविभज्यते॥ १३७॥

अर्थग्रहणे तर्कस्य महत्त्वमुपस्थापयतिः 'विद्यमानेऽप्यर्थे तस्याऽविवक्षा, पारार्थ्येन गर्भितानामर्थानां ग्रहणम्, लिङ्गैरर्थोपलब्धिः, इत्यादौ प्रसंगे तर्कस्यावश्यकता भवत्येव।

सतोऽविवक्षा : लिंगसंख्याकालादीनामविवक्षा, तेषां विद्यमानत्वेपि। यथा 'कर्तुरीप्सततमं कर्म' इति सूत्रे सत्यपि नपुंसकप्रयोगे लिंगभेदं विवक्षितं नैव। सर्वेषामेव च लिंगानां कर्मत्वं विधीयते। एवमेव 'गृहं सम्मार्ष्टि' प्रयोगे एकत्वसंख्या अविवक्षिता। तथैव 'स्त्रियं ये चोपजीवन्ति प्राप्तास्तेऽमृतलक्षणं' इत्यत्र कालमविवक्षितम्।

पारार्थ्यम् : 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र अनभिहितोऽपि श्वादिभ्यो दधि रक्षत्येव, पारार्थ्यात्।

लैङ्गिकीः व्यक्ति : शब्दात्सामान्येनावसीयमानस्य स्वार्थस्य

वाक्यान्तरप्रलपनेन विशेषाऽभिव्यक्तिररिति बहुविधो न्यायः। 'अक्ताः शर्कराः' अत्र 'तेजो वै घृतम्' अनेन लिंगेन 'घृतेनाक्ताः' इत्यर्थो गृह्यते।

एषां च सर्वेषामेव प्रसंगे तर्काश्रयोऽग्राह्यो निवार्यश्च भवत्येव।''

Sometimes, in a sentence, one does not mean, what seems to be said apparently. Sometimes a wider or far-fetched meaning is intended, than what is apparent. And, sometimes the meaning is not conveyed verbally, or it is understood by some specified indications or hints. These facts or conclusions could be ascertained with the help of logic only. And, thus we are able to see the truth, which otherwise might have remained un seen.

''किसी विद्यमान तत्त्व की अविवक्षा, परार्थ की उपलब्धि, और संकेत या लक्षणों से अर्थ की उपलब्धि, आदि ऐसी बातें हैं, जिनके लिए हमें तर्क का आश्रय लेना ही पड़ता है।''

अविवक्षा—कारक 'कर्म' स्वतः नपुंसक लिंग है, किन्तु उसका अभिप्राय सभी लिंग के शब्दों से है। अतः 'कर्तुरीप्सिततमं कर्म' में लिंग अविवक्षित है।

परार्थोपलब्धि—'कौओं से दही बचाना' से यह भी परार्थ ग्रहण होता ही है कि 'कुत्तों आदि से भी रक्षा करना'।

लैंगिकी अभिव्यक्ति—'अक्ताः शर्कराः' में 'घृतेनाक्ताः' इसलिए अर्थ लिया जाता है कि 'तेजो वै घृतम्' जैसे वचनों में घृत ही संकेतित है। अतः यहाँ भी वह संकेतित माना गया है।

इस प्रकार इन सब प्रसंगों में तर्क का आश्रय लेना ही पड़ता है, ताकि सत्योपलब्धि हो।'

शब्दानामेव सा शक्तिस्तर्को यः पुरुषाश्रयः।
शब्दाननुगतो न्यायोऽनागमेष्वनिबन्धनः॥ १३८॥

तर्कोऽपि शब्दानां शक्तिमेवाश्रितस्तदुपनिबन्धनो वा, न पुनरनुमानाश्रितः, इत्युपस्थापयति :

''शब्द एवोपदेष्टा। तत्सामर्थ्यमेवानुगच्छन्तो वक्तारो योग्यशब्दनिबन्धनयैव विवक्षया प्रवर्त्तन्ते। नियतां तु शब्दशक्तिमर्थप्रकरण-

लिंगवाक्यादिभिरनुगच्छत्स्वपि पुरुषेषु शब्दाश्रितमेव सामर्थ्यं पुरुषाश्रयोऽयं तर्क इति मन्यन्ते। शब्दशक्तिरूपापरिगृहीतस्तु साधर्म्यवैधर्म्यमात्राऽनुसारी शुष्कस्तर्को अनागमेषु आगमज्ञानरहितेषु पुरुषेषु व्यर्थ एव। तेन न हि सत्यार्थोपलब्धिर्भवितुमर्हति।"

It is the power of the word, which is called as Logic and which resides in human beings. For the people, who are non-conversant with the vedic tradition, the mere logic also does not work. It must be based on the words or their powers, and must be in conformity with the Vedic logic.

"पुरुष में आश्रित तर्क शब्द पर ही आश्रित होता है, या उसकी ही शक्ति के रूप में स्थित रहता है। अर्थात् शब्द के लिंग, प्रकरण, वाक्य, काल, आदि पर आश्रित रहकर किया गया तर्क ही हमें सही अर्थ का परिज्ञान करा सकता है। इन सबका बिना आश्रय लिए बढ़ने वाला तर्क निराधार एवं शुष्क होता है। क्योंकि ये सब शक्तियां या उपादान शब्द के ही हैं। इनके द्वारा ही शब्द का सही अभिधेय पता चलता है। सामान्य पुरुष तो वेदादि के ज्ञान से भी रहित होते हैं। उनका अनागम तर्क तो शुष्क या कोरा तर्क कहलाएगा ही; क्योंकि वे उसके वास्तविक स्वरूप से परिचित हुए बिना केवल श्रुतिमात्र से ही अर्थोपलब्धि संभव मान कर प्रवृत्त होते हैं।"

रूपादयो यथा दृष्टाः प्रत्यर्थं यतशक्तयः।
शब्दास्तथैव दृश्यन्ते विषापहरणादिषु ॥१३६॥

शब्दानां यतशक्तित्वं कथयति : "यथा रूपत्वे गन्धत्वे रसत्वे वा समानेऽपि सति तस्य तस्य रूपस्य नीलहरितादिकस्य, गन्धस्य विषपुष्पमालतीपुष्पादिकस्य वा, रसस्यापि मधुरकट्वादिकस्य वा, प्रत्येकं प्रभावो शक्तिर्वा पृथगेव ज्ञायतेऽनुभूयते च, दृष्टादृष्टफलत्वं च तेषां दृश्यते, एवमेव शब्दानां वेदसूक्तानां वा विषाऽपहरणादिकं प्रभावमपि पृथक्शो दृश्यतेऽनुभूयते च। शब्दानां प्रभावोऽनेनैव स्पष्टम्। शब्दत्वे समानेऽपि तेषां व्यक्तिशोऽर्थाभिव्यक्तिर्भवत्येव।"

Just as in their sensuous nature the colour, the odour and the touch etc., are common, but still their different varieties and

kinds have their own particular purposes or effects.

In the same way, though all the words are common in nature, still different words or mantras have different purposes and effects. That is why, even if they are one by nature, they are supposed to signify their own individual meanings, also.

"जिस प्राकर रूप रस गन्ध आदि की दृष्टि से समान होने पर भी नीलहरितादि वर्ण, मधुरकषायादिरस और विषैलीमधुरादि गन्ध अपना-अपना व्यक्तिगत प्रभाव रखते हैं, उसी प्रकार शब्द होने की दृष्टि से तत्त्वात्मक समानता होने पर भी प्रत्येक शब्द का अपना अर्थ और प्रयोजन होता है। जैसे कुछ वेदसूक्तों का व्यक्तिशः प्रभाव विषापहरण या अन्य भिन्न-भिन्न प्रभावों के रूपमें देखा जा सकता है।"

यथैषां तत्र सामर्थ्यं धर्मेऽप्येवं प्रतीयताम् ।
साधूनां साधुभिस्तस्माद् वाच्यमभ्युदयार्थिनाम् ॥१४०॥

आगमानामिव लोकानामपि प्रयोजनं साधुशब्देनैव : "यथैषां रूपादीनां स्वकार्यविशेषे उक्तरीत्या सामर्थ्यं विद्यते शब्दानां च यतशक्तित्वं दृश्यते, एवं साधूनामपि शब्दानां धर्मविषये सामर्थ्यं प्रतीयताम् । तेषां धर्मसाधनत्वात् यज्ञादिप्रसंग इव लौकिकप्रसंगेऽपि तेषां साधुशब्दानामेव व्यवहारो विधेयः । साधुशब्दानां नैव केवलं धर्मसाधने प्रयोग. । अपितु व्यवहारसाधनेऽपि त एव वाच्यतां गच्छन्ति ।"

Just as the sensuous subjects or the words have their individual significance and power, in the same way the correct words also have power, with regard to the performance of the spiritual duties. Thus, for the people, who are striving for their own rise and uplift, only the correct words have any meaning and weight. For them, corrupt words have no importance. These correct words are equally good for the popular usage as well.

"जिस प्रकार रूपादि की सामर्थ्य ऊपर बताई गई है, और जिस प्रकार शब्दों की नियत शक्तियों की चर्चा हुई है, उसी प्रकार साधु या व्याकरण-सम्मत शब्दों की भी सामर्थ्य धर्म के विषय में नियत है। अर्थात् धर्म के अभ्युदय

में शब्दों के साधु प्रयोग का बड़ा भारी हाथ रहता है। परन्तु जिस प्रकार साधु शब्दों की उपयोगिता धर्म और आगमों के सम्बन्ध में है, उसी प्रकार उनकी दैनिक लौकिक व्यवहार में भी है। अर्थात्, दैनिक प्रयोग में भी साधु शब्दों से ही अभ्युदय की प्राप्ति होती है।''

टिप्पणी:—दे० महाभाष्य प्रथम आह्निक—'वाग्योगविद्' के प्रसंग में—'दुष्यति चापशब्दैः'।

सर्वोऽदृष्टफलानर्थान् आगमात्प्रतिपद्यते।
विपरीतं च सर्वत्र शक्यते वक्तुमागमे ॥१४१॥

कथं नैषामधर्मेऽपि सामर्थ्यमिति विवेचयति : ''सर्वेष्वागमेषु दृष्टादृष्टाफलासु प्रतिपत्तिषु अधर्मसाधकत्वेन विपरीतफलावाप्तिः शक्यते प्रसङ्क्तुम्। तस्मादागमं कंचित् प्रमाणीकृत्य व्यवस्थिते तस्मिन् या काचिदुपपत्तिरुच्यमाना प्रतिपत्तावुपोद्बलकत्वं समर्थकत्वं वा लभते। एवमेव लौकिकानामपि शब्दानां साधुभूतानां विषये शक्यते वक्तुम्। तत्रापि धर्मसाधनत्वविषये शुष्कस्तर्को हेयः।''

In regard to all conclusions, relating to the visible or invisible results of the sacred texts, it would be possible to postulate an opposite effect, as well. Therefore if, after taking some sacred text as authority, its meaning is settled, then any reasoning, that is put forward, would strengthen the understanding of it.

''सभी लोग आगम या वेदों से ऐसे अर्थों और प्रयोजनों की प्रतीति पा लेते हैं, जिनका फल दृष्ट या अदृष्ट भी हो सकता है। ये अर्थ धर्म के साधनभूत होते हैं। ठीक इसके विपरीत अधर्मसाधक शब्दों की बात है। जिस तरह धर्म साधनों का प्रत्यय होता है, उसी प्रकार सर्वत्र उससे विपरीत शब्दों को विपरीत रूप में भी लिया जा सकता है।''

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ॥१४२॥

व्याकरणस्य स्मृतिरूपत्वं साधुत्वप्रतिपादकत्वं च कथयति : "यथैव भक्ष्याभक्ष्यवाच्यावाच्यत्वादिविषये स्मृतयो व्यवस्थिताः, प्रामाण्यं च तासामेव तस्मिन् विषये, तथैव शब्दानामपि साधुत्वासाधुत्वविषये प्रयोज्याप्रयोज्यत्वविषये वा व्याकरणमेव प्रमाणं, स्मृतिरूपोपनिबद्धत्वात् । स्मृतो ह्यर्थः पारम्पर्यादविच्छेदेन पुनः पुनर्निबध्यते । प्रसिद्धसमुदाचारायां च स्मृतौ अविच्छिन्नं शिष्टप्रयोगमेवाश्रित्य केचन नियमा व्याकरणस्मृतिरूपेण प्रतिबध्यन्ते । तदेव हि स्मृतिनिबन्धनम् । अनया च रीत्या शिष्टप्रयोगः स्थिरतामभ्युपैति ।"

Just as, in the case of eatables and sex etc., the correctness or otherwise is known through the written or unwritten tradition, in the same way the grammatical tradition tells about the correctness or otherwise of the words. What is remembered from generation to generation, in an uninterrupted manner, is time and again embodied in the words or book-forms. Even the unwritten tradition can be ascertained from the practice of the cultural and disciplined people.

"जिस प्रकार भक्ष्याभक्ष्य और वाच्यावाच्य आदि का ज्ञान धर्म-स्मृतियों से होता है, उसी प्रकार शब्दों के साधुत्व या असाधुत्व का ज्ञान व्याकरणस्मृति के द्वारा होता है। इसे 'स्मृति' इसलिए कहा, क्योंकि इसका अस्तित्व शिष्ट प्रयोग की अविच्छिन्न स्मृतिपरम्परा पर आश्रित होता है। स्मृति का कार्य परम्परा को उपनिबद्ध करना है । और, व्याकरण का कार्य भी भाषा के परम्परागत प्रयोगों को नियमित और यथावत् रूपमें सुरक्षित रखना और परम्परा बताना है ।"

टिप्पणी:—त्रिपदी के शब्द : "उच्यते स्मृतिशास्त्रमिदम् ।·· पारम्पर्येणाविच्छिन्न उपदेश आगमः । श्रुतिलक्षणः स्मृतिलक्षणाश्च ।"

वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥१४३॥

व्याकरणस्य क्षेत्रमुद्घोषयन् वाचो विविधानि पदानि परिगणयति : "एतद् व्याकरणं स्मृतिशास्त्रं वा वाचो अद्भुतं परमं च

पदं विद्यते । यथा वाचो वैखरीमध्यमापश्यन्तीभेदेन त्रीणि पदानि विद्यन्ते, तेषामप्याश्रयभूतत्वादिदं व्याकरणं नाम पदं तेभ्योऽपि नितरामुच्चम् । वाक् चानेकस्थानोद्भूता त्रिभिरेव पदैरत्र व्याकरणे प्रतिष्ठिता, तेषामेवास्य विषयत्वात् ।

"परैः संवेद्यं यस्याः श्रुतिविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी । मध्यमा त्वन्तःसंनिवेशिनी परिगृहीतक्रमेव बुद्धिमात्रोपादाना । प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः पश्यन्ती । तत्र व्यावहारिकीषु सर्वासु वागवस्थास्वेतासु व्यवस्थितः साध्वसाधुप्रविभागः पुरुषसंस्कारहेतुरेकेषाम् । परन्तु पश्यन्तीरूपमनपभ्रंशमसंकीर्णं लोकव्यवहारातीतम् । तस्या एव त्रय्या वाचो व्याकरणेन साधुत्वज्ञानलभ्येन वा शब्दपूर्वेण योगेन तत्पश्यन्तीरूपमपि लभ्यते, व्याकरणविषयत्वं चोपगच्छति, इति भावः ।"

The Science of Grammar is the supreme and wonderful means of knowledge of any form of speech, which takes its appearance after passing through different stages. Vāikharī, amongst these, is the elaborate and produced form of the speech. Madhyamā is related to the effort and breath stage, *i.e.* lying in between the mental and pronounced states of the speech. This is the stage of articulation as well. Paśyantī is the stage of mind, wherein the joining and breaking process takes place. This constructional and affixation stage of the speech does also come under the purview of grammatical processes. Hence, these all the three stages become the subject of the grammatical analysis.

"वाणी के तीन पद वैखरी, मध्यमा, और पश्यन्ती के रूपमें माने गए हैं । वे तीनों ही इस व्याकरण के क्षेत्र में आते हैं । अर्थात् उन तीनों ही चरणों में व्याकरण की आवश्यकता रहती है । इस कारण यह व्याकरण त्रिपदा वाक् का इन तीन पदों से भी ऊपर चौथा या सर्वोच्च पद है । यह वाक् अनेक स्थानों से उत्पन्न होती है ।

"इनमें से वैखरी अन्यों द्वारा अनुभूयमान व्यक्ता वाक् है । मध्यमा का सम्बन्ध बुद्धि और उच्चारण की प्रयत्नावस्था से है, जिसमें वह ध्वनिक्रम को पाती है । परन्तु, पश्यन्ती बुद्धिस्थ शब्द की वह स्थिति है, जिसमें शब्द अखण्ड

रूपमें मन या बुद्धि में स्थित रहता है । व्याकरण का साधुत्व-असाधुत्व निर्णय वस्तुतः इसी पद में अधिक प्रभावी रहता है । क्योंकि इस पद में ही ज्ञान अपने शुद्ध रूपमें रहता है ।"

टिप्पणी:—यहां यह स्मर्त्तव्य है कि मीमांसक और आलंकारिक वाणी के जिन चार पदों की कल्पना करते हैं, उनमें 'परा' इच्छा और हृदय का विषय होने के कारण, और शब्दाख्य परमाणुओं का केन्द्र होने के कारण, व्याकरण का विषय नहीं बैठती । शेष तीनों तक ही व्याकरण के प्रकृति-प्रत्यय-विभाग की पहुँच होने के कारण तथा साधु-असाधु का निर्णायक होने के कारण इन तीन पदों को ही यहां स्वीकार कर व्याकरण को वाणी का 'परम पद' कहा गया है ।"

तद् विभागाविभागाभ्यां क्रियमाणमवस्थितम् ।
स्वभावज्ञैश्च भावानां दृश्यन्ते शब्दशक्तयः ॥१४४॥

व्याकरणस्य कार्यं प्रतिदिशन्नाह : "विभागो नाम प्रकृति-प्रत्ययादिरूपेण परप्रतिपादनाय कृतो भेदः । तद्यथा धातोस्त-व्यदादयः । तथा चोक्तम् 'यत्तावदयं सामान्येन शक्नोत्युपदेष्टुं तत्तावदुपदिशति ।' अविभागस्तु यत्र स्वरूपेणोच्चारणम् । तद्यथा 'दार्धर्तिदर्धर्तिदाश्वान्साह्वान्' इति । कानिचिद् व्याकरणानि बह्वविभागानि बहून् शब्दान् प्रत्यक्षपक्षेण प्रतिपादयन्ति । कानिचित्तु विभाज्यानुमानपक्षेण बहूनां समुदायानां प्रतिपादनं कुर्वन्ति । सैषा स्मृतिर्यथाकालं पुरुषशक्त्यपेक्षया तथा तथा व्यवस्थाप्यते । सन्ति तु साधुप्रयोगानुमेया एव शिष्टाः । सर्वेषु ज्ञेयेषु अप्रतिबद्धान्तः-प्रकाशास्ते विशिष्टकालावधिप्रविभागां यथाकालं धर्माधर्मसाधन-भावेन समन्वितां शब्दशक्तिमव्यभिचारेण पश्यन्ति ।

"क्रियमाणम्-इत्यस्याभिप्रायो रचिताः रच्यमानाः भाविनो वा व्याकरणागमाः ।"

There are two kinds of Grammar. One, which stresses the analytical and critical processes. Other, which stresses on collecting the words and sentence-formations, without taking recourse to the analytical process. The trained or cultured

people know the words by their nature. They also know the various powers hidden therein, as well as the nature of all the beings. Thus, Grammar becomes an instrument in their hands, to show or display the powers of the words, through their different usages in different times. The variety of grammar schools does also originate due to this very fact. It explains the different powers of the words.

"वाणी का वह परम पद व्याकरण दो प्रकार से रचा जाता है : विभागात्मक प्रक्रिया अपनाकर, या अविभाग पाठ की विधि अपनाकर। प्रकृति-प्रत्य-विभाग के द्वारा बहुत लोगों को प्रक्रिया समझने में आसानी रहती है। इसमें 'सामान्य' को खोज निकालने पर अधिक बल रहता है। अविभाग की पद्धति में सिद्ध रूपों की ही परिगणना करके व्याकरण की रचना की जाती है। ऐसा मन्द-बुद्धियों के लिए करना पड़ता है।

"परन्तु वाणी के स्वभाव को जानने वाले अथवा सहज ज्ञान वाले ऋषियों आदि के लिए प्रविभाग और साधु-असाधु का निर्णय स्वाभाविक और सहजात होता है। उन्हें शब्द की शक्तियों और सीमाओं का पदार्थों और भावों के साथ सम्बन्ध पता होता है।"

टिप्पणी :—इसमें शिष्टों की स्मृति और ज्ञान को व्याकरण से भी अधिक महत्त्वपूर्ण माना गया है। व्याकरण का निबन्धन करने वाले वे ही होते हैं।

अनादिमव्यवछिन्नां श्रुतिमाहुरकर्तृकाम्।
शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः ॥ १४५ ॥

श्रुतिवत् स्मृतिरप्यव्यवच्छिन्ना—इत्युपस्थापयन्नाह : "ये शब्द-प्रमाणकास्ते आगमस्येव वेदस्येव वा श्रुतेरपि व्यवस्थामव्यच्छिन्नां मन्यन्ते। श्रुतिस्तु तेषां कृते अपौरुषेयत्वाद् अकर्तृका अत एवा-विच्छेद्या च। सा चाव्यभिचरितस्वरवर्णानुपूर्व्यदेशकालनियमा न केनचित्कर्त्रा प्रकारान्तरेणावस्थापितपूर्वा सर्वकालं सर्वप्रदेशेषु प्रति-चरणविभागेन व्यवस्थिता। स्मृतिरप्यविच्छेद्या अर्थनित्या च। सा चाविच्छिद्यमानार्थापि गद्यश्लोकवाक्यादिभेदेन प्रतिकालमन्यथा शिष्टैरेव निबध्यते, प्रवाहरूपेण च स्थिता भवति।"

S'ruti has been declared to be the beginningless, continuous and without an author. Smṛti, the written tradition, on the other hand, is composed and edited by the trained and cultured ones. But the latter is also continuous and imperishable, like the former one, because of the fact that the knowledge of the cultured ones is based on the Scripture itself. So, like the Scriptures, Smṛti or written tradition is also continuous.

"श्रुति नाम श्रवण परम्परा में सुरक्षित रहने से पड़ा है। उसकी रचना कोई नहीं करता। वह अपौरुषेय होने से अकर्तृका और नित्य है। स्वरवर्णानुपूर्वी में कोई अन्तर नहीं आता, चाहे स्थान, काल और देश का कितना ही भेद हो जाए। किन्तु **स्मृति** तो शिष्ट जनों द्वारा निबद्ध परम्परासूत्र हैं। पर शिष्टों और आप्तों द्वारा निबद्ध होने के कारण काल और देश का, अथवा गद्य और पद्य का, भेद होने पर भी सही विश्लेषण पर आधारित होने से वह नित्य और प्रवाह रूप में अव्यवच्छिन्न है।"

टिप्पणी :—यहां **श्रुति** और **स्मृति** का तुलनात्मक विवेचन आया है। इस पर विचार हम पहले भी कर आए हैं। मुख्य बात यहां वेद की सर्वकालिक और सार्वदेशिक अभिन्नता की है; जब कि मनुष्यकृत ज्ञान होने से स्मृति में यह भिन्नता स्पष्ट रह सकती है।

अविभागाद् विवृत्तानामभिख्या स्वप्नवच्छ्रुतौ।
भावतत्त्वं तु विज्ञाय लिंगेभ्यो विहिता स्मृतिः॥ १४॥

श्रुतिस्मृत्योरन्तरं पुनरप्यभिदधाति : "लौकिकानां सामान्यानां कृते कथितं पूर्वं—'श्रुतिस्मृत्युदितं धर्मं'—इत्यादिः। येषां तु स्वप्नबोधवृत्त्या नित्यं विभक्तपुरुषानुकारितया कारणं प्रवर्त्तते, तेषां शब्दब्रह्मणो विवर्तभावमधिगतानामृषीणां श्रुतौ वेदे स्वप्नवत् अभिख्या मानसं ज्ञानं भवति। यथा स्वप्ने श्रोत्रनिरपेक्षं बाह्यविषयाभावेन तदनुकारशून्यं च शब्दविषयं मानसं ज्ञानं भवति, तथा सर्गादिभुवां महर्षीणां कृते वेदः। अर्थात् ते प्रज्ञयैव सर्वमाम्नायं सर्वभेदशक्तियुक्तमभिन्नशक्तियुक्तं च पश्यन्ति। स्मृतिस्तु भावानां पदार्थानां तत्त्वं विज्ञायार्षेण चक्षुषा वेदोक्तानेव लिंगान् दृष्ट्वा विहिता भवति। पुरुषानुग्रहोपघातविषयं तेषामर्थानां स्वभावमुपलभ्य, क्वचित्तद्विषयाणि लिंगानि दृष्ट्वा दृष्टादृष्टार्था स्मृतिरुपनिबध्यते कैश्चित्।"

For those great sages, who in the beginning thought everything evolving out of the undivided or undifferentiated whole, the knowledge and revelation of S'ruti came as the revelation in a dream. They recognised and grasped it formally as well as purposefully, as it was revealed to them.

The written tradition or Smṛti, on the other hand, is composed by the later sages, after following the true nature of the things and the signs and indications given in the Vedas. The sense of the divisions is clear in those smṛtis.

"सामान्य जनों को धर्म के लिए श्रुति स्मृति का पाठ या ज्ञान आवश्यक होता है। किन्तु सृष्टि के आदि में होने वाले ऋषियों का ज्ञान तो स्वप्नगत शब्दरहित अवबोध की भांति था, जिसमें उन्हें विषय की उपस्थिति और पदार्थ की विद्यमानता के बिना भी मानस ज्ञान के रूपमें वेद की उपलब्धि हुई थी। ऋषियों का ज्ञान तो सदा ही देशकाल की सीमा से हीन होता है।

"उन्हीं में से परवर्ती ऋषियों ने स्मृतियों का निर्माण किया। उन्होंने प्रत्येक भाव के तत्त्व को अपनी आर्ष दृष्टि से पहचाना, और उस पहचान का आधार बनाया वेद में कथित लक्षणों को। बाद में उन्हें ही लिपिबद्ध करके उन्होंने **स्मृति** के रूपमें प्रकाशित किया।"

टिप्पणी :—यहां श्रुति और स्मृति के आविर्भाव का स्वरूप बताया गया है। ज्ञान की प्रतीति का भी उभयत्र अन्तर बताया गया है। वेद में यह अविभाग और भावों से विवृत्त है, जब कि स्मृति का निर्माण लिंग और भावों के ज्ञान पर आश्रित होता है।

कायवाग्बुद्धिविषया ये मलाः समवस्थिताः।
चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ॥ १४७ ॥

"यथैव हि शरीरे दोषशक्तिं रत्नौषधादिषु च दोषप्रतीकारसामर्थ्यं च दृष्ट्वा चिकित्साशास्त्रमारब्धम्; रागादींश्च बुद्धेरुपप्लवानवगम्य तदुपघातहेतुज्ञानोपायभूतान्यध्यात्मशास्त्राणि चोपनिबद्धानि; तथैवेदमपि साधूनां वाचः संस्काराणां ज्ञापनार्थमपभ्रंशानां चोपघातानां त्यागार्थं व्याकरणात्मकं लक्षणशास्त्रमारभ्यते।"

The impurities, which belong to the body, mind and speech, are removed and purification is put in by the sciences of Medicine, Philosophy and Grammar, respectively. With the help of these sciences the impurities are reformed into purities.

"जिस प्रकार शरीर में होने वाले दोषज रोगों को और रत्नौषधि आदि में होने वाली उनकी प्रतीकार-सामर्थ्य को देखकर चिकित्साशास्त्र का आरम्भ होता है, और जिस प्रकार रागद्वेषादि बुद्धि के विकारों को जानकर और उनके प्रतिकार के उपायों को जानकर अध्यात्मशास्त्र आदि की रचना की जाती है, उसी प्रकार वाग्दोषों को और उनके संस्कारार्थ उपायों को देखकर व्याकरण रूपी लक्षणशास्त्र की रचना की जाती है।"

टिप्पणी :—व्याकरण का मुख्य कार्य वाग्दोषों को दूर करना है। यह कार्य संस्कार के द्वारा सम्पन्न होता है। दोषत्याग तभी होता है।

शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते।
तमपभ्रंशमिच्छन्ति विशिष्टार्थविनिवेशिनम् ॥१४८॥

अपभ्रंशत्वं साधुत्वं च परस्परापेक्षमित्युपस्थापयति : "शब्द-प्रकृतिरपभ्रंशः इति संग्रहकारः। नाप्रकृतिरपभ्रंशः स्वतन्त्रः कश्चिद्विद्यते। सर्वस्यैव हि साधुरेवापभ्रंशस्य प्रकृतिः। प्रसिद्धेस्तु रूढितामापद्यमानाः स्वातन्त्र्यमेव केचिदपभ्रंशा लभन्ते। तत्र गौरिति प्रयोक्तव्ये अशक्त्या प्रमादादिभिर्वा गाव्यादयस्तत्प्रकृतयोऽ-पभ्रंशाः प्रयुज्यन्ते। ते च सास्नादिमत्येव लब्धस्वरूपाः साधुत्वं विजहति। अर्थान्तरे तु प्रयुज्यमानाः साधव एव विज्ञायन्ते। न ह्येतेषां रूपमात्राद्धि प्रतिबद्धंसाधुत्वम्। प्रसिद्धिश्च तेषां विशिष्टार्थविनिवेशनेनैव।"

According to Vyāḍi,' the correct word is the origin of the incorrect one'. There is no corrupt form, independent of the original. But, these may become independent by the constant usage and convention. Just as 'gāvī', in place of 'gāuh', is corrupt, if it is used in the sense the 'cow'; as denoted by the

latter word. But it is correct, if it is used in some sense other than that one. Then it becomes stabilized, as well as recognised, in that latter particular sense

Thus *Correct* or *Corrupt* terms are merely relative and may apply to the same word, in different contexts.

"**अपभ्रंश** भी मूलत: शब्द की प्रकृत अवस्था से ही जन्म लेता है। अर्थात्, सामान्य शब्दों के समान ही अपभ्रंश का मूल भी भाषा की सामान्य प्रकृति से ही आरम्भ होता है। सत्य यह है कि कोई भी शब्द बिना मूल के रह नहीं सकता। अत: **साधु** शब्दों को ही अपभ्रंश शब्दों की प्रकृति मानना होगा। धीरे-धीरे उस अपभ्रंश अवस्था में ही वे अर्थस्वातन्त्र्य की दृष्टि से वे स्वतन्त्र जैसे बन जाते हैं। 'गौ:' शब्द के स्थान पर प्राय: 'गावी, गोणी' आदि शब्दों का प्रयोग आरम्भ हो जाता है। परन्तु इनका जन्म उसी 'गौ:' से ही हुआ है, क्योंकि अन्तत: ये उसी के विकार हैं। अब स्थिति यह होती है कि अगर तो इन्हें 'गौ' के ही अर्थ में प्रयोग करें, तब तो ये अपभ्रंश शब्द गिने जाएंगे। किन्तु इन्हें यदि किसी भिन्न अर्थ में प्रयोग करें, तब ये भी साधु ही गिने जाएंगे। केवल रूपमात्र के आधार पर किसी भी शब्द को अपभ्रंश या असाधु नहीं माना जा सकता।"

टिप्पणी :—**अपभ्रंश** का इतना सुन्दर और वैज्ञानिक वर्णन अन्यत्र नहीं मिलता। अपभ्रंश को **असाधु** कहना गलत है। एक शब्द से अनेक बनाना मनुष्य का स्वभाव है। हां, उसी अर्थ में रूपान्तर करना अप्रासंगिक और अर्थ-हीन कहा जाएगा। अत: रूपान्तर का प्रयोजन अर्थ की नवीनता होनी चाहिए। यदि यह नवीनता उपस्थित है, तब कोई भी शब्द 'साधु' ही है। क्योंकि आकार ही अपभ्रष्ट होने का प्रमाण नहीं है। अर्थप्रसिद्धि और लोकप्रसिद्धि तथाकथित अपभ्रंश शब्दों का भी साधुत्व प्रमाणित कर देती है।

अस्वगोण्यादय: शब्दा: साधवो विषयान्तरे।
निमित्तभेदात्सर्वत्र साधुत्वं च व्यवस्थितम् ॥१४६॥

अपभ्रंशस्य शब्दस्य साधुत्वं विवृणोति : "आवपने गोणी,—स्वविप्रयोगाभिधाने चास्व इत्येतयोरवस्थितं साधुत्वम्। तथा सास्नादिमति हृषितादिलिंगे च निमित्तान्तरात् प्रवृत्तावेतयोरन्यत्र विषये लब्धसंस्कारयो: साधुत्वमेव विज्ञायते। गोणीवेयं गौर्गोणीति

बहुक्षीरधारणादिविषयादावपनसामान्याद् अभिधीयते। तथा अविद्यमानं स्वमस्य सोऽयमस्व इति। तस्माद् वस्त्वपरिगृहीतकारणं न किंचिन्नियतमस्ति, यत्र साधुत्वमसाधुत्वं वा व्यवतिष्ठेत।"

The words like 'asva' and 'goṇī' etc., are Correct ones, if they are not being used in the sense of 'horse' and 'cow' etc., respectively. Their usage in other senses makes or proves them to be correct ones. Everywhere the Correctness is determined by a particular meaning or cause, which is the instigator of that particular usage.

"अश्व और गौ शब्दों के विकार के रूप में ही 'अस्व' और 'गोणी' आदि शब्दों का प्रचलन हो जाता है। पूर्वोक्त दोनों शब्दों की दृष्टि से ये दोनों शब्द अपभ्रंश है। किन्तु यदि इनका प्रयोग उन दोनों से किसी भिन्न अर्थ में होने लगा है, जैसे गोणी का अर्थ बोने के किसी साधन से लिया जाए और अस्व का अर्थ 'स्व से हीन' अवस्था से लिया जाए, तब प्रकृत मूल से आकर भी ये साधु ही कहलाएंगे। अतः वस्तु के साथ जब तक इनका सम्बन्ध ज्ञात न हो, तब तक केवल रूपविकार मात्र देखकर इन्हें असाधु अपभ्रंश या साधु आदि नामों से पुकारना भ्रामक होगा।"

ते साधुष्वमानेन प्रत्ययोत्पत्तिहेतवः।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥१५०॥

अपभ्रंशानामर्थप्रकाशिकां शक्तिं स्पष्टीकरोति : "अपभ्रंशा हि शब्दाः साधूनां शब्दानां विषये प्रयुज्यमानाः अक्षिनिकोचादय इव परिचयादुपगृहीतस्वरूपा प्रसिद्धाश्च, साधुरूपेणैवार्थं प्रत्याययन्ति। तादात्म्यमिति वस्तूपग्रहणेन साधुशब्दादभेदात्मा प्रत्ययः। अर्थस्य प्रकाशका इति धात्वादिजन्यमर्थतत्त्वं तथाभूतं नैवास्ति। अत एवोदितमनु मानेनेति। यथानुमानेन कश्चित्प्रत्ययो गृह्यते, न च धात्वादिमूलकत्वात्, तथैव ह्यपभ्रंशानामेतेषाम्।"

The incorrect or corrupt words give rise to a cognition like that of the correct ones. That is due to the similarity of certain

signs or inferences. This cognition, of their relation with the correct ones, makes them one with the latter. Then, after becoming one with the correct ones, they convey the meaning of the latter as though it was their own.

"अपभ्रंश शब्द भी साधु शब्दों की भांति अर्थ का प्रत्यय कराते हैं। किन्तु उनके द्वारा होने वाला यह प्रत्यय अनुमान पर आश्रित होता है। धातु-प्रत्ययादि-विभाग की भांति उनमें कोई स्थिर आधार नहीं खोजा जा सकता। फिर भी अर्थ का प्रत्यय कराने की दृष्टि से वे साधु शब्दों से इस अर्थ में अभिन्न होते हैं कि वे अक्षिसंकोचादि की भांति किन्हीं स्थिर और प्रसिद्ध अर्थों की अभिव्यक्ति कराने लगते हैं। पर इनका स्थितलक्षण शब्दार्थ या वस्तुगत अर्थ, उतना साधार न होकर, अक्षिसंकोचादि की भांति अनुमानाश्रित होता है। इनसे किसी वस्तु या द्रव्य का साक्षात् अभिधान नहीं होता।"

न शिष्टैरनुगम्यन्ते पर्याया इव साधवः।
ते यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥१५१॥

कथमेतेषामपभ्रंशानां पर्यायत्वं नैव सिद्ध्यति इति विवेचयन्नाह : "न हि शिष्टसमाचारप्रसिद्धेरन्यदेवंविधेषु स्मृतिनिबन्धनेष्वर्थेषु निमित्तमभिधीयते। गाव्यादयश्चेत् पर्यायाः स्युरेतेऽपि शिष्टैर्लक्षणैरनुगम्येरन् प्रयुज्येरंश्च। यश्च प्रत्यक्षपक्षेण प्रयोजकेष्वभिधेयेषु प्रवर्त्तते स साधुः। साक्षात्तु प्रयोजकं वाच्यमर्थरूपं साधुभिः प्रत्याय्यते। तेषां पुनरपभ्रंशानां साक्षादवाचकत्वाद् अनुमानाश्रयत्वाच्च साधुत्वं नैव व्यवस्थितम्। अतः पर्यायरूपेण तेषां ग्रहणं साधुत्वाभावे नैव सिद्ध्यति।"

They cannot be treated as to be directly expressives. It is because, they are never thought as synonyms of the 'correct' words by the cultured and disciplined ones, as far as the written form of tradition, *i.e.* Grammar, is concerned. That means that in the eyes of grammar, those incorrect words, even though they denote a definite meaning, are not to be accepted as directly expressives and hence those are incorrect or corrupt ones.

"क्योंकि शिष्ट लोग उन्हें स्मृतिशास्त्र के द्वारा साधु शब्दों के पर्याय के रूप में स्वीकार नहीं करते, अतः वे वस्तुओं या पदार्थों के भी साक्षात् अवाचक हो जाते हैं। अर्थात्, उनका अर्थों से वाच्यवाचक सम्बन्ध नहीं होता। शिष्ट लोग उन्हें स्मृतिशास्त्र के अनुकूल इसलिए नहीं पाते कि उनमें परम्परापुष्ट लक्षणों का अभाव पाया जाता है। इसीलिए शिष्ट लोग इन्हें प्रयोग भी नहीं करते।"

टिप्पणी:—त्रिपदी टीका में भर्तृहरि कहते हैं : 'शिष्टप्रयोगमभिसमीक्ष्य प्रकृतिरूहितव्या प्रत्ययश्च।' अर्थात् साधुत्व का निर्णय और प्रकृति-प्रत्यय का विभाग शिष्टप्रयोग पर निर्भर करता है। पर अपभ्रंश शब्दों को शिष्ट लोग पर्याय के रूप में प्रयोग नहीं करते। इसीलिए उन्हें साधुवत् व्यवहृत नहीं किया जा सकता।

अम्बाम्बेति यथा बालः शिक्षमाणोऽपभाषते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः ॥१५२॥

अव्यक्ता अपि ध्वनयोऽर्थं वहन्त्येव प्रतिपत्तारश्चानुगच्छन्त्यभिप्रायमित्यर्थाभिव्यक्तिरपभ्रंशेनापि संभवा : "यथा बालो हि करणमात्रशक्तिवैक्ल्याद् यत्नवानपि साधुप्रयुयुक्षायामव्यक्तां श्रुतिं प्रयुङ्क्ते। प्रतिपत्तारो ग्रहीतारो वा तस्याव्यक्तस्य ध्वनेः प्रकृतिं व्यक्तं शब्दमवधारयन्ति जानन्ति वा। तेषां कृते बालध्वनिर्नैवार्थयुक्ता। अपितु तेन सूचितं साधुशब्दमेव ते तत्रार्थविनिवेशिनं मन्यन्ते। एवमेवापभ्रंशशब्दविषयेऽपि वेदितव्यम्। अर्थस्तु तत्रापि साधुशब्दस्यैव, यस्यायं विकारोपभ्रंशः।"

Just as the child, while learning to pronounce 'ambā', (*i.e.* mother), pronounces it in the beginning as 'mmā, mmā', etc., in a very indistinct form. And, just as the listeners, who know his speech very well, understand the meaning of that word, relying only on the correct form of that. Thus the Incorrect word becomes the source of the ascertainment or the knowledge of the correct one.

"बोलना सीखते हुए जिस प्रकार तुतलाहट के साथ बालक कोई अव्यक्त

ध्वनि या अस्पष्ट शब्द बोलता है, परन्तु सुननेवाले उससे सम्बद्ध किसी साधु शब्द की कल्पना करके ही उसमें स्थित अर्थ का अनुमान करते हैं। परन्तु इस प्रकार का अर्थ उनकी दृष्टि में साधु शब्द का अर्थ ही गिना जाएगा, न कि उस अव्यक्त ध्वनि का। इसी प्रकार अपभ्रंश के द्वारा भी यदि कोई साधु अर्थ प्रतीत होता है, तो वह उसका न होकर साधु शब्द रूप से सम्बद्ध ही होता है।"

एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥१५३॥

तदेवोपसंहरते : "संकीर्णायामपमिश्रायां वा वाचि कालक्रमेण साधुविषयेऽपशब्दा अपभ्रंशा वा प्रयुज्यन्ते । तैः शिष्टा लक्षणविदः साधून् प्रतिपद्यन्ते । तैरेव साधुभिस्तदर्थमभिधीयमानं ते पश्यन्ति । साधुशब्दप्रयोगेऽर्थसंशये सति साधुना यत्किंचिदानुपूर्वीसाम्येन तदपभ्रंशमनुमीय तेनाऽर्थं प्रतिपादयन्तीति यावत् ।"

In the same way, when an incorrect word is used in place of a correct one, the understanding of its meaning is preceded by the correct word coming to the mind. It is so, because the cultured people understand the correct words only. According to them the meaning resides in the correct words alone. The corrupt form causes the inference of the correct one, as smoke of the fire.

"इसी प्रकार जहां साधु शब्द का प्रयोग विहित हो, वहां यदि अपभ्रंश शब्द का प्रयोग किया जाए, तब उसके द्वारा उसी अर्थ का वहन होता है, जिसे अन्यथा वह साधु शब्द वहन करता। दूसरे शब्दों में, अपभ्रंश शब्द के द्वारा लोकप्रसिद्धि के कारण वही अर्थ समझा जाने लगता है, जो अर्थ उससे सम्बद्ध साधु शब्द से समझा जाने चाहिए था।"

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः ॥१५४॥

"साधुविषये एवंभूता ये ऽपभ्रंशशब्दा परम्परादीर्घतया बहुकालपर्यन्तं प्रयुज्यमाना रूढितामुपगता प्रचलिता व्यवहृता वा

भवन्ति, तत्तु वक्तृणां गुणसंस्काररहितत्वात् तथा संभवति। येषु चार्थेषु ते प्रचलिता भवन्ति, साधुशब्दाभिहिता तेऽर्थास्तदा साधुशब्दैर्न कथ्यन्ते । तेषां स एव प्रकृतिभूतः साधुशब्दस्तदा वाचको भवति ।"

